# Mahavakya Ratnavali

# મહાવાક્યરત્નાવલી

## Document Information

Text title : Mahavakya Ratnavali

File name : mahavakyaratnavali.itx

Category : major_works, svara

Location : doc_z_misc_major_works

Author : Sw. Ramachandrendra Sarasvati (aka UpanishadBrahma Yogin)

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Edited by Vasudev Lakshman Panshikar (7th edn.)

Latest update : September 29, 2013, October 6, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Mahavakya Ratnavali

# મહાવાક્યરત્નાવલી

શ્રીઃ ।

મહાવાક્યરત્નાવલિઃ

નામ

શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યરામચન્દ્રયતિ-

ગ્રથિતેશાવાસ્યાદ્યષ્ટોત્તરશતોપનિષદાં

સારસઙ્ગ્રહઃ ।

પણશીકરોપાહ્વલક્ષ્મણાત્મજવાસુદેવશર્મણા સંશોધિતઃ

(સપ્તમં સંસ્કરણમ્)

---

। મહાવાક્યરત્નાવલિસ્થવિષયક્રમઃ વાક્યસંખ્યા ચ ।

વિષયાઃ


મઙ્ગલાચરણમ્ -

અષ્ટોત્તરશતોપનિષદઃ મહાવાક્યરત્નાવલી પદયોજના ચ

૧ વિધિવાક્યાનિ ૬૬

૨ બન્ધમોક્ષવાક્યાનિ ૩૧

૩ અવિદ્વન્નિન્દાવાક્યાનિ ૨૧

૪ જગન્મિથ્યાવાક્યાનિ ૩૩

૫ ઉપદેશવાક્યાનિ ૫૪

૬ જીવબ્રહ્મૈક્યવાક્યાનિ ૩૮

૭ મનનવાક્યાનિ ૩૯

૮ જીવન્મુક્તિવાક્યાનિ ૧૧૯

૯ સ્વાનુભૂતિવાક્યાનિ ૧૧૮

૧૦ સમાધિવાક્યાનિ ૫૦

૧૧ નાનાલિઙ્ગસ્વરૂપવાક્યાનિ ૩૨ [૬૦૧]

૧૨ પુલ્લિઙ્ગસ્વરૂપવાક્યાનિ ૩૦

૧૩  સ્ત્રીલિઙ્ગસ્વરૂપવાક્યાનિ        ૧૨
૧૪  નપુંસકલિઙ્ગસ્વરૂપવાક્યાનિ        ૩૯
૧૫  આત્મસ્વરૂપમહાવાક્યાનિ        ૪૦
૧૬  સર્વસ્વરૂપવાક્યાનિ        ૪૦
૧૭  બ્રહ્મસ્વરૂપવાક્યાનિ        ૯૪
૧૮  અવશિષ્ટવાક્યાનિ        ૩૬
૧૯  ફલવાક્યાનિ        ૪૦
૨૦  વિદેહમુક્તિવાક્યાનિ        ૭૭    [૪૦૭]
૧૦૦૮
ઉપસંહારઃ

ઇતિ વિષયાનુક્રમણિકા સમ્પૂર્ણા ।

==========================================

અથ પઞ્ચ શાન્તયઃ ।

વાક્-પૂર્ણ-સહના-પ્યાયં-ભદ્રંકર્ણેભિરેવ ચ ।
પઞ્ચ શાન્તીઃ પઠિત્વાદૌ પઠેદ્વાક્યાન્યનન્તરમ્ ॥

ઇત્યુક્તં તાશ્ચ -

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા મનો મે વાચિ
પ્રતિષ્ઠિતમાવિરાવીર્મ એધિ ॥ વેદસ્ય મ આણીસ્થઃ
શ્રુતં મે મા પ્રહાસીરનેનાધીતેનાહોરાત્રાન્સન્દધામ્યૃતં
વદિષ્યામિ સત્યં વદિષ્યામિ તન્મામવતુ તદ્વક્તારમવતુ
અવતુ મામવતુ વક્તારમવતુ વક્તારમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ ૧॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ॥

પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ ૨॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં
કરવાવહૈ । તેજસ્વિ નાવધીતમસ્તુ મા વિદ્વિષાવહૈ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ ૩॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃશ્રોત્રમથો
બલમિન્દ્રિયાણિ ચ સર્વાણિ સર્વં બ્રહ્મોપનિષદં માહં
બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મનિરાકરોદનિરાકરણમસ્ત્વનિરાકરણં
મે અસ્તુ તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે મયિ સન્તુ તે મયિ સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ ૪॥

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવા । ભદ્રં
પશ્યેમાક્ષભિર્યજત્રાઃ । સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ ।
વ્યશેમ દેવહિતં યદાયુઃ ॥ સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ।
સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ । સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ।
સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ ૫॥

ઇતિ પઞ્ચ શાન્તયઃ ।

---

અથ મઙ્ગલાચરણમ્ ।

ૐ શ્રીમદ્વિશ્વાધિષ્ઠાનાય પરમહંસાય નમઃ ।
યો વિદ્યાદિવિદેહાન્તમહાવાક્યાર્થવિગ્રહઃ ।
શ્રીરામચન્દ્રરૂપાય તસ્મૈ ભૂતાત્મને નમઃ ॥ ૧॥

યઃ પૂજ્યો યતિભિઃ સ્વધર્મનિરતૈર્ધ્યાયન્તિ યં યોગિનો
યેનાત્તં નિગમાન્તવેદ્યમનિશં યસ્મૈ હવિર્દીયતે ॥

યસ્માત્સ્થાવરજઙ્ગમં સમભવદ્યસ્યાંશમાનોઽવરો
યસ્મિંલ્લીનમિદં પ્રણૌમિ સતતં તં વાસુદેવં ગુરુમ્ ॥ ૨॥

નત્વા શ્રીવાસુદેવેન્દ્રપાદપઙ્કેરુહદ્વયમ્ ॥

ગ્રથ્યતે વૈ મહાવાક્યરત્નાવલિરિયં મયા ॥ ૩॥

અષ્ટોત્તરશતોપનિષદઃ ।

અથ ખલ્વૃગ્વેદાદિવિભાગેન વેદાશ્ચત્વારઃ ॥

તત્રૈકવિંશતિશાખા ઋચઃ ॥

નવાધિકશતશાખા યજુષઃ ॥

સહસ્રશાખા સામ્નઃ ॥

પઞ્ચાશચ્છાખા અથર્વણસ્ય ॥

એકૈકસ્યાઃ શાખાયા એકૈકોપનિષત્ ॥

આહત્યાશીતિસહિતશતાધિકસહસ્રસઙ્ખ્યાકા ઉપનિષદઃ ॥

તાસુ શ્રીરામચન્દ્રેણ રામદૂતાય સારતરોપનિષદ
અષ્ટોત્તરશતસઙ્ખ્યાકા ઉપદિષ્ટાઃ ॥

તથા ચ મુક્તિકોપનિષત્સ્થાષ્ટોત્તરશતોપનિષન્નામશ્લોકા લિખ્યન્તે -
“ઈશકેનકઠપ્રશ્નમુણ્ડમાણ્ડૂક્યતિત્તિરિઃ ।
ઐતરેયં ચ છાન્દોગ્યં બૃહદારણ્યકં તથા ॥ ૧॥

બ્રહ્મ કૈવલ્યજાબાલૌ શ્વેતાશ્વો હંસ આરુણિઃ ।
ગર્ભો નારાયણો હંસો બિન્દુનાદશિરઃ શિખા ॥ ૨॥

મૈત્રાયણીકૌશિતકીબૃહજ્જાબાલતાપિની ।
કાલાગ્નિરુદ્રમૈત્રેયી સુબાલક્ષુરિમન્ત્રિકા ॥ ૩॥

સર્વસારં નિરાલમ્બં રહસ્યં વજ્રસૂચિકમ્ ।
તેજો નાદધ્યાનવિદ્યાયોગતત્ત્વાત્મબોધકમ્ ॥ ૪॥

પરિવ્રાટ્ ત્રિશિખી સીતા ચૂડા નિર્વાણમણ્ડલમ્ ।
દક્ષિણા શરભં સ્કન્દં મહાનારાયણાહ્વયમ્ ॥ ૫॥

રહસ્યં રામતપનં વાસુદેવં ચ મુદ્ગલમ્ ।
શાણ્ડિલ્યં પૈઙ્ગલં ભિક્ષું મહચ્છારીરકં શિખા ॥ ૬॥

તુર્યાતીતં ચ સંન્યાસં પરિવ્રાજાક્ષમાલિકા ।
અવ્યક્તૈકાક્ષરં પૂર્ણા સૂર્યાક્ષ્યધ્યાત્મકુણ્ડિકા ॥ ૭॥

સાવિત્ર્યાત્મા પાશુપતં પરં બ્રહ્માવધૂતકમ્ ।
ત્રિપુરા તપનં દેવી ત્રિપુરા કઠભાવના ॥ ૮॥

હૃદયં કુણ્ડલીભસ્મરુદ્રાક્ષગણદર્શનમ્ ।
તારસારમહાવાક્યપઞ્ચબ્રહ્માગ્નિહોત્રકમ્ ॥ ૯॥

ગોપાલતાપનં કૃષ્ણં યાજ્ઞવલ્ક્યં વરાહકમ્ ।
શાટ્યાયની હયગ્રીવં દત્તાત્રેયં ચ ગારુડમ્ ॥ ૧૦॥

કલિજાબાલિસૌભાગ્યરહસ્યઋચમુક્તિકા ” ઇતિ ॥

(ઈશાદ્યષ્ટોત્તરશતોપનિષદાં શાખાભેદં દર્શયતિ)
તત્ર દશોપનિષદ ઋગ્વેદગતાઃ ॥

શુક્લકૃષ્ણભેદેન યજુષ એકપઞ્ચાશત્ ॥

તત્ર શુક્લયજુષ એકોનવિંશતિઃ ॥

કૃષ્ણયજુષો દ્વાત્રિંશત્ ॥

સામ્નઃ ષોડશ ॥

અથર્વણસ્યૈકત્રિંશત્ ॥

આહત્યાષ્ટોત્તરશતમ્ ॥

(અથૈષાં પૂર્વાચાર્યપ્રકાશિતત્વં દર્શયતિ)
તત્ર ગૌડપાદાચાર્યૈર્માણ્ડૂક્યોપનિષદ્વ્યાખ્યાતા ॥

શ્રીમચ્છઙ્કરભગવત્પાદાચાર્યૈર્દશોપનિષદઃ ॥

પઞ્ચરુદ્રં નૃસિંહતાપની ચ શઙ્કરાનન્દૈઃ ॥

સદાશિવબ્રહ્મેન્દ્રૈઃ સ્વયંપ્રકાશાનન્દાદ્યૈશ્ચ  દ્વાત્રિંશોપનિષદઃ ॥

વિદ્યારણ્યાચાર્યૈરષ્ટોત્તરશતોપનિષદો વ્યાખ્યાતાઃ ॥

પ્રકૃતે તુ -
(મહાવાક્યરત્નાવલ્યાખ્યાયિકાયાસ્ત્રયોદશધા વિભાગં દર્શયતિ)
રામચન્દ્રેણોપદિષ્ટે રામદૂતાય ધીમતે ॥

ઈશાદ્યષ્ટોત્તરશતોપનિષદ્યાદસામ્પતૌ ।
નિમજ્જ્યાત્ર મહાવાક્યરત્નાવલિરુદાહૃતા ॥

વિભાવ્યતે વિભાગેન સા ત્રયોદશધા પુનઃ ॥

તત્રાદૌ વિધિવાક્યાનિ બન્ધમોક્ષપરાણિ ચ ॥

અવિદ્વદ્ધ્યેયવાક્યાનિ જગન્મિથ્યાપરાણિ ચ ॥

તથોપદેશવાક્યાનિ જીવેશૈક્યપરાણિ ચ ॥

બ્રહ્મવિન્મનનાખ્યાનિ જીવન્મુક્તિપરાણિ ચ ॥

બ્રહ્માનુભૂતિરૂપાણિ તત્સમાધિપરાણિ ચ ॥

અષ્ટસ્વરૂપવાક્યાનિ ફલવાક્યાન્યનન્તરમ્ ॥

વિદેહમુક્તિવાક્યાનિ લિખ્યન્તેઽન્વિષ્ય તત્ક્રમાત્ ॥

(માહાવાક્યરત્નાવલ્યાં યથોક્તાધિકારિણં દર્શયતિ)
યઃ સ્વાશ્રમાચારરતઃ પરિવ્રાડ્વિજિતેન્દ્રિયઃ ॥

સોઽધિકારી મહાવાક્યરત્નાવલ્યાં ન ચાપરઃ ॥

વાક્-પૂર્ણ-સહના-પ્યાયં-ભદ્રંકર્ણેભિરેવ ચ ।
પઞ્ચ શાન્તીઃ પઠિત્વાદૌ પઠેદ્વાક્યાન્યનન્તરમ્ ॥

---

૧ અથ સાર્ધાન્તિકવિધિવાક્યાનિ । (૬૬)
ૐ સર્વં ખલ્વિદં બ્રહ્મ તજ્જલાનિતિ શાન્ત ઉપાસીત ॥ ૧॥

આત્માનમેવાવેદહં બ્રહ્માસ્મીતિ ॥ ૨॥

આત્મા વા અરે દ્રષ્ટવ્યઃ શ્રોતવ્યો મન્તવ્યો નિદિધ્યાસિતવ્યઃ ॥ ૩॥

મહત્પદં જ્ઞાત્વા વૃક્ષમૂલે વસેત્ ॥ ૪॥

સચ્ચિદાનન્દાત્માનમદ્વિતીયં બ્રહ્મ ભાવયેત્ ॥ ૫॥

અહં બ્રહ્માસ્મીત્યનુસન્ધાનં કુર્યાત્ ॥ ૬॥

સ તજ્જ્ઞો બાલોન્મત્તપિશાચવજ્જડવૃત્ત્યા લોકમાચરેત્ ॥ ૭॥

બ્રાહ્મણઃ સમાહિતો ભૂત્વા તત્ત્વંપદૈક્યમેવ સદાભ્યસેત્ ॥ ૮॥

સર્વત્રાદ્વૈતબ્રહ્મબુદ્ધિં કુર્યાત્ ॥ ૯॥

આશામ્બરો ન નમસ્કારો ન સ્વાહાકારો ન સ્વધાકારો ન
નિન્દાસ્તુતિર્યાદૃચ્છિકો ભવેત્ ॥ ૧૦॥

સર્વતઃ સ્વરૂપમેવ પશ્યન્ જીવન્મુક્તિમવાપ્ય પ્રારબ્ધપ્રતિભાસનાશપર્યન્તં
સ્વરૂપાનુસન્ધાનેન વસેત્ ॥ ૧૧॥

સ્વરૂપાનુસન્ધાનં વિનાઽન્યથાચારપરો ન ભવેત્ ॥ ૧૨॥

વેદાન્તશ્રવણં કુર્વન્ યોગં સમારભેત ॥ ૧૩॥

આકુઞ્ચનેન કુણ્ડલિન્યાઃ કપાટમુદ્ઘાટ્ય મોક્ષદ્વારં વિભેદયેત્ ॥ ૧૪॥

યચ્છેદ્વાઙ્મનસી પ્રાજ્ઞસ્તદ્યચ્છેજ્જ્ઞાન આત્મનિ ॥ ૧૫॥

જ્ઞાનમાત્મનિ મહતિ નિયચ્છેત્તદ્યચ્છેચ્છાન્ત આત્મનિ ॥ ૧૬॥

આત્માનં ચેદ્વિજાનીયાદયમસ્મીતિ પૂરુષઃ ॥ ૧૭॥

કિમિચ્છન્કસ્ય કામાય શરીરમનુસંજ્વરેત્ ॥ ૧૮॥

તમેવ ધીરો વિજ્ઞાય પ્રજ્ઞાં કુર્વીત બ્રાહ્મણઃ ॥ ૧૯॥

નાનુધ્યાયાદ્બહૂઞ્શબ્દાન્વાચોવિગ્લાપનં હિ તત્ ॥ ૨૦॥

યતો નિર્વિષયસ્યાસ્ય મનસો મુક્તિરિષ્યતે ॥ ૨૧॥

અતો નિર્વિષયં નિત્યં મનઃ કાર્યં મુમુક્ષુણા ॥ ૨૨॥

ચિત્તમેવ હિ સંસારસ્તત્પ્રયત્નેન શોધયેત્ ॥ ૨૩॥

દૃશ્યં હ્યદૃશ્યતાં નીત્વા બ્રહ્માકારેણ ચિન્તયેત્ ॥ ૨૪॥

માયાકાર્યમિમં ભેદમસ્તિચેદ્બ્રહ્મભાવનમ્ ॥ ૨૫॥

દેહોઽહમિતિ દુઃખં ચેદ્બ્રહ્માહમિતિ નિશ્ચયઃ ॥ ૨૬॥

હૃદયગ્રન્થિરસ્તિત્વે છેદને બ્રહ્મચક્રકમ્ ॥ ૨૭॥

સંશયે સમનુપ્રાપ્તે બ્રહ્મનિશ્ચયમાપ્નુયાત્ ॥ ૨૮॥

વિજ્ઞેયોઽક્ષરતન્માત્રો જીવિતં ચાપિ ચઞ્ચલમ્ ॥ ૨૯॥

વિહાય શાસ્ત્રજાલાનિ યત્સત્યં તદુપાસ્યતામ્ ॥ ૩૦॥

યસ્ય સ્ત્રી તસ્ય ભોગેચ્છા નિસ્ત્રીકસ્ય ક્વ ભોગભૂઃ ॥ ૩૧॥

સ્ત્રિયં ત્યક્ત્વા જગત્ત્યક્તં જગત્ત્યક્ત્વા સુખી ભવેત્ ॥ ૩૨॥

ચિત્તં કારણમર્થાનાં તસ્મિન્સતિ જગત્ત્રયમ્ ॥ ૩૩॥

તસ્મિન્ક્ષીણે જગત્ક્ષીણં તચ્ચિકિત્સ્યં પ્રયત્નતઃ ॥ ૩૪॥

સુપ્તેરુત્થાય સુપ્ત્યન્તં બ્રહ્મૈકં પ્રવિચિન્ત્યતામ્ ॥ ૩૫॥

ગચ્છઁસ્તિષ્ઠન્નુપવિશંશ્છયાનો વાન્યથાપિ વા ॥ ૩૬॥

યથેચ્છયા વસેદ્વિદ્વાનાત્મારામઃ સદા મુનિઃ ॥ ૩૭॥

જ્યોતિર્લિઙ્ગં ભ્રુવોર્મધ્યે નિત્યં ધ્યાયેત્સદા યતિઃ ॥ ૩૮॥

આત્માનમાત્મનઃ સાક્ષાદ્બ્રહ્મબુદ્ધ્યા સુનિશ્ચલમ્ ॥ ૩૯ ॥

દેહજાત્યાદિસમ્બન્ધાન્વર્ણાશ્રમસમન્વિતાન્ ॥ ૪૦ ॥

વેદશાસ્ત્રપુરાણાદિ પદપાંસુમિવ ત્યજેત્ ॥ ૪૧ ॥

એકાકી નિઃસ્પૃહસ્તિષ્ઠેન્ન હિ કેન સહાલપેત્ ॥ ૪૨ ॥

ઉદ્યાન્નારાયણેત્યેવં પ્રતિવાક્યં સદા યતિઃ ॥ ૪૩ ॥

મુનિઃ કૌપીનવાસાઃ સ્યાન્નગ્નો વા ધ્યાનતત્પરઃ ॥ ૪૪ ॥

અધ્યાત્મરતિરાસીનો નિરપેક્ષો નિરાશિષઃ ॥ ૪૫ ॥

આત્મનૈવ સહાયેન સુખાર્થી વિચરેદિહ ॥ ૪૬ ॥

સન્દિગ્ધઃ સર્વભૂતાનાં વર્ણાશ્રમવિવર્જિતઃ ॥ ૪૭ ॥

અન્ધવજ્જડવચ્ચાપિ મૂકવચ્ચ મહીં ચરેત્ ॥ ૪૮ ॥

યદ્યત્પશ્યતિ ચક્ષુર્ભ્યાં તત્તદાત્મેતિ ભાવયેત્ ॥ ૪૯ ॥

યદ્યચ્છૃણોતિ કર્ણાભ્યાં તત્તદાત્મેતિ ભાવયેત્ ॥ ૫૦ ॥

લભતે નાસયા યદ્યત્તત્તદાત્મેતિ ભાવયેત્ ॥ ૫૧ ॥

જિહ્વયા યદ્રસં હ્યત્તિ તત્તદાત્મેતિ ભાવયેત્ ॥ ૫૨ ॥

ત્વચા યદ્યત્સ્પૃશેદ્યોગી તત્તદાત્મેતિ ભાવયેત્ ॥ ૫૩ ॥

દૃષ્ટિં જ્ઞાનમયીં કૃત્વા પશ્યેદ્બ્રહ્મમયં જગત્ ॥ ૫૪ ॥

દ્રષ્ટૃદર્શનદૃશ્યાનાં વિરામો યત્ર વા ભવેત્ ॥ ૫૫ ॥

દૃષ્ટિસ્તત્રૈવ કર્તવ્યા ન નાસાગ્રાવલોકની ॥ ૫૬ ॥

દેવાગ્ન્યગારે તરુમૂલે ગુહાયાં વસેદસઙ્ગોઽલક્ષિતશીલવૃત્તઃ ॥ ૫૭ ॥

નિરિન્ધનજ્યોતિરિવોપશાન્તો ન ચોદ્વિજેદુદ્વિજેદ્યત્રકુત્ર ॥ ૫૮ ॥

શાન્તો દાન્ત ઉપરતસ્તિતિક્ષુર્યોઽનૂચાનો હ્યભિજજ્ઞૌ સમાનઃ ॥ ૫૯ ॥

ત્યક્તેષણો હ્યનૃણસ્તં વિદિત્વા મૌની વસેદાશ્રમે યત્ર કુત્ર ॥ ૬૦ ॥

યમૈશ્ચ નિયમૈશ્ચૈવ હ્યાસનૈશ્ચ સુસંયતઃ ॥ ૬૧ ॥

નાડીશુદ્ધિં ચ કૃત્વાદૌ પ્રાણાયામં સમાચરેત્ ॥ ૬૨ ॥

સર્વચિન્તાં પરિત્યજ્ય સાવધાનેન ચેતસા ॥ ૬૩॥

નિર્વિકલ્પઃ પ્રસન્નાત્મા પ્રાણાયામં સમાચરેત્ ॥ ૬૪॥

મરુદભ્યસનં સર્વં મનોયુક્તં સમભ્યસેત્ ॥ ૬૫॥

ઇતરત્ર ન કર્તવ્યા મનોવૃત્તિર્મનીષિણા ॥ ૬૬॥

ઇતિ સાર્ધાન્તિકવિધિવાક્યાનિ ષટ્ષષ્ટિઃ ॥ ૬૬॥

ઇતિ પ્રથમં પ્રકરણં સમાપ્તમ્ ।

---

૨ અથ સાર્ધાન્તિકબન્ધમોક્ષવાક્યાનિ । (૩૧)

દેહાદીનાત્મત્વેનાભિમન્યતે સોઽભિમાન આત્મનો બન્ધઃ ॥ ૧॥

તન્નિવૃત્તિર્મોક્ષઃ ॥ ૨॥

દેવમનુષ્યાદ્યુપાસનાકામસઙ્કલ્પો બન્ધઃ ॥ ૩॥

કર્તૃત્વાદ્યહઙ્કારસઙ્કલ્પો બન્ધઃ ॥ ૪॥

અણિમાદ્યષ્ટૈશ્વર્યાશાસિદ્ધસઙ્કલ્પો બન્ધઃ ॥ ૫॥

યમાદ્યષ્ટાઙ્ગયોગસઙ્કલ્પો બન્ધઃ ॥ ૬॥

કેવલં મોક્ષાપેક્ષાસઙ્કલ્પો બન્ધઃ ॥ ૭॥

સઙ્કલ્પમાત્રસમ્ભવો બન્ધઃ ॥ ૮॥

નિત્યાનિત્યવસ્તુવિચારાદનિત્યસંસારસુખદુઃખવિષયસમસ્તક્ષેત્રમમતા-
બન્ધક્ષયો મોક્ષઃ ॥ ૯॥

મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ॥ ૧૦॥

બન્ધનં વિષયાસક્તં મુક્ત્યૈ નિર્વિષયં સ્મૃતમ્ ॥ ૧૧॥

મમેતિ બધ્યતે જન્તુર્નમમેતિ વિમુચ્યતે ॥ ૧૨॥

મમત્વેન ભવેજ્જીવો નિર્મમત્વેન કેવલઃ ॥ ૧૩॥

સ્વસઙ્કલ્પવશાદ્બદ્ધો નિઃસઙ્કલ્પાદ્વિમુચ્યતે ॥ ૧૪॥

દ્રષ્ટા દૃશ્યવશાદ્બદ્ધો દૃશ્યાભાવે વિમુચ્યતે ॥ ૧૫॥

ઇચ્છામાત્રમવિદ્યેયં તન્નાશો મોક્ષ ઉચ્યતે ॥ ૧૬॥

ભોગેચ્છામાત્રકં બન્ધસ્તત્ત્યાગો મોક્ષ ઉચ્યતે ॥ ૧૭॥

ચિચ્ચૈત્યકલના બન્ધસ્તન્મુક્તિર્મુક્તિરુચ્યતે ॥ ૧૮॥

અનાસ્થૈવ હિ નિર્વાણં દુઃખમાસ્થાપરિગ્રહઃ ॥ ૧૯॥

કર્મણા બધ્યતે જન્તુર્વિદ્યયા ચ વિમુચ્યતે ॥ ૨૦॥

સ્વરૂપાવસ્થિતિર્મુક્તિસ્તદ્ભ્રંશોઽહન્ત્વવેદનમ્ ॥ ૨૧॥

ચિત્તે ચલતિ સંસારો નિશ્ચલે મોક્ષ ઉચ્યતે ॥ ૨૨॥

બન્ધો હિ વાસનાબદ્ધો મોક્ષઃ સ્યાદ્વાસનાક્ષયઃ ॥ ૨૩॥

પદાર્થભાવનાદાર્ઢ્યં બન્ધ ઇત્યભિધીયતે ॥ ૨૪॥

વાસનાતાનવં બ્રહ્મન્ મોક્ષ ઇત્યભિધીયતે ॥ ૨૫॥

ન મોક્ષો નભસઃ પૃષ્ઠે ન પાતાલે ન ભૂતલે ॥ ૨૬॥

સર્વાશાસંક્ષયે ચેતઃક્ષયો મોક્ષ ઇતીષ્યતે ॥ ૨૭॥

મોક્ષો મેઽસ્ત્વિતિ ચિન્તાન્તર્જાતા ચેદુત્થિતં મનઃ ॥ ૨૮॥

મનનોત્થે મનસ્યેષ બન્ધઃ સાંસારિકો મતઃ ॥ ૨૯॥

તત્પ્રમાર્જનમાત્રં હિ મહાસંસારતાં ગતમ્ ॥ ૩૦॥

તત્પ્રમાર્જનમાત્રન્તુ મોક્ષ ઇત્યભિધીયતે ॥ ૩૧॥

ઇતિ સાર્ધાન્તિકબન્ધમોક્ષવાક્યાન્યેકત્રિંશત્ ॥ ૩૧॥

દ્વિતીયં પ્રકરણં સમાપ્તમ્ ।

૩ અથ સાર્ધાન્તિકાવિદ્વન્નિન્દાવાક્યાનિ । (૨૧)

અથ યોઽન્યાં દેવતામુપાસ્તેઽન્યોસાવન્યોઽહમસ્મીતિ ન સ વેદ
યથા પશુઃ ॥ ૧॥

અત્ર ભિદામિત્ર મન્યમાનઃ શતધા સહસ્રધા ભિન્નો મૃત્યોઃ
સ મૃત્યુમાપ્નોતિ ॥ ૨॥

કર્તૃત્વાદ્યહઙ્કારભાવનારૂઢો મૂઢઃ ॥ ૩॥

મૃત્યોઃ સ મૃત્યુમાપ્નોતિ ય ઇહ નાનેવ પશ્યતિ ॥ ૪॥

અનુભૂતિં વિના મૂઢો વૃથા બ્રહ્મણિ મોદતે ॥ ૫॥

પ્રતિબિમ્બિતશાખાગ્રફલાસ્વાદનમોદવત્ ॥ ૬॥

અષ્ટાઙ્ગં ચ ચતુષ્પાદં ત્રિસ્થાનં પઞ્ચદૈવતમ્ ॥ ૭॥

ઓઁકારં યો ન જાનાતિ બ્રાહ્મણો ન ભવેત્તુ સઃ ॥ ૮॥

અતિવર્ણાશ્રમં રૂપં સચ્ચિદાનન્દલક્ષણમ્ ॥ ૯॥

યો ન જાનાતિ સોઽવિદ્વાન્કદા મુક્તો ભવિષ્યતિ ॥ ૧૦॥

કુશલા બ્રહ્મવાર્તાયાં વૃત્તિહીનાઃ સુરાગિણઃ ॥ ૧૧॥

તેઽપ્યજ્ઞાનતયા નૂનં પુનરાયાન્તિ યાન્તિ ચ ॥ ૧૨॥

કાષ્ઠદણ્ડો ધૃતો યેન સર્વાશી જ્ઞાનવર્જિતઃ ॥ ૧૩॥

સ્વાયત્તમેકાન્તહિતં સ્વેપ્સિતત્યાગવેદનમ્ ॥ ૧૪॥

યસ્ય દુષ્કરતાં યાતં ધિક્તં પુરુષકીટકમ્ ॥ ૧૫॥

અદ્વિતીયબ્રહ્મતત્ત્વં ન જાનન્તિ યદા તદા ॥ ૧૬॥

ભ્રાન્તા એવાખિલાસ્તેષાં ક્વ મુક્તિઃ ક્વેહ વા સુખમ્ ॥ ૧૭॥

અજ્ઞાનોપહતો બાલ્યે યૌવને વનિતાહતઃ ॥ ૧૮॥

શેષે કલત્રચિન્તાર્તઃ કિં કરોતિ નરાધમઃ ॥ ૧૯॥

ઇચ્છાદ્વેષસમુત્થેન દ્વન્દ્વમોહેન જન્તવઃ ॥ ૨૦॥

ધરાવિવરમગ્નાનાં કીટાનાં સમતાં ગતાઃ ॥ ૨૧॥

ઇતિ સાર્ધાન્તિકાવિદ્વન્નિન્દાવાક્યાનિ એકવિંશત્ ॥ ૨૧ ॥

તૃતીયં પ્રકરણં સમાપ્તમ્ ।

---

૪ અથ સાર્ધાન્તિકજગન્મિથ્યાવાક્યાનિ । (૩૩)

નાન્યત્કિઞ્ચન મિષત્ ॥ ૧॥

વાચારમ્ભણં વિકારો નામધેયં મૃત્તિકેત્યેવ સત્યમ્ ॥ ૨॥

અતોઽન્યદાર્તમ્ ન તુ તદ્દ્વિતીયમસ્તિ ॥ ૩॥

નાત્ર કાચન ભિદાઽસ્તિ ॥ ૪॥

નૈવ તત્ર કાચન ભિદાઽસ્તિ ॥ ૫॥

સર્વં વિકારજાતં માયામાત્રમ્ ॥ ૬॥

સર્વત્ર ન હ્યસ્તિ દ્વૈતસિદ્ધિઃ ॥ ૭॥

નાસ્તિ દ્વૈતં કુતો મર્ત્યમ્ ॥ ૮॥

પ્રપઞ્ચો યદિ વિદ્યેત નિવર્તેત ન સંશયઃ ॥ ૯॥

માયામાત્રમિદં દ્વૈતમદ્વૈતં પરમાર્થતઃ ॥ ૧૦॥

વિકલ્પો વિનિવર્તેત કલ્પિતો યદિ કેનચિત્ ॥ ૧૧॥

ઉપદેશાદયં વાદો જ્ઞાતે દ્વૈતં ન વિદ્યતે ॥ ૧૨॥

દ્વિતીયકારણાભાવાદનુત્પન્નમિદં જગત્ ॥ ૧૩॥

યથૈવેદં નભઃ શૂન્યં જગચ્છૂન્યં તથૈવ હિ ॥ ૧૪॥

ઇદં પ્રપઞ્ચં યત્કિઞ્ચિદ્યદ્યજ્જગતિ વીક્ષ્યતે ॥ ૧૫॥

દૃશ્યરૂપં ચ દૃગ્રૂપં સર્વં શશવિષાણવત્ ॥ ૧૬॥

ઇદં પ્રપઞ્ચં નાસ્ત્યેવ નોત્પન્નં નો સ્થિતં જગત્ ॥ ૧૭॥

ચિત્તં પ્રપઞ્ચમિત્યાહુર્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૧૮॥

માયાકાર્યાદિકં નાસ્તિ માયા નાસ્તિ ભયં ન હિ ॥ ૧૯॥

પરં બ્રહ્માહમસ્મીતિ સ્મરણસ્ય મનો ન હિ ॥ ૨૦॥

વન્ધ્યાકુમારવચને ભીતિશ્ચેદસ્ત્વિદં જગત્ ॥ ૨૧॥

શશશૃઙ્ગેણ નાગેન્દ્રો મૃતશ્ચેજ્જગદસ્તિ સત્ ॥ ૨૨॥

મૃગતૃષ્ણાજલં પીત્વા તૃપ્તશ્ચેદસ્ત્વિદં જગત્ ॥ ૨૩॥

ગન્ધર્વનગરે સત્યે જગદ્ભવતિ સર્વદા ॥ ૨૪॥

ગગને નીલિમાસત્યે જગત્સત્યં ભવિષ્યતિ ॥ ૨૫॥

માસાત્પૂર્વં મૃતો મર્ત્યો હ્યાગતશ્ચેજ્જગદ્ભવેત્ ॥ ૨૬॥

ગોસ્તનાદુદ્ભવં ક્ષીરં પુનરારોપણે જગત્ ॥ ૨૭॥

જ્વાલાગ્નિમણ્ડલે પદ્મવૃદ્ધિશ્ચેદસ્ત્વિદં જગત્ ॥ ૨૮॥

જ્ઞાનિનો હૃદયં મૂઢૈર્જ્ઞાતં ચેદસ્ત્વિદં જગત્ ॥ ૨૯॥

અજકુક્ષૌ જગન્નાસ્તિ હ્યાત્મકુક્ષૌ જગન્ન હિ ॥ ૩૦॥

સર્વદાઽભેદકલને દ્વૈતાદ્વૈતં ન વિદ્યતે ॥ ૩૧॥

નાસ્તિ નાસ્તિ જગત્સર્વં ગુરુશિષ્યાદિકં ન હિ ॥ ૩૨॥

સચ્ચિદાનન્દમાત્રોઽહમનુત્પન્નમિદં જગત્ ॥ ૩૩॥

ઇતિ જગન્મિથ્યાવાક્યાનિ ત્રયસ્ત્રિંશત્ ॥ ૩૩॥

ચતુર્થં પ્રકરણં સમાપ્તમ્ ।

---

૫ અથ સાર્ધાન્તિકોપદેશવાક્યાનિ । (૫૪)

સ ય એષોઽણિમૈતદાત્મ્યમિદં સર્વં તત્સત્યં સ આત્મા
તત્ત્વમસિ શ્વેતકેતો ॥ ૧॥

અભયં વૈ જનક પ્રાપ્તોઽસિ ॥ ૨॥

બ્રહ્મચર્યમહિંસાં ચાપરિગ્રહં સત્યં ચ યત્નેન હે
રક્ષતો હે રક્ષતો હે રક્ષત ઇતિ ॥ ૩॥

તત્ત્વમસિ ત્વં તદસિ ॥ ૪॥

યન્મનસા ન મનુતે યેનાહુર્મનો મતમ્ ॥ ૫॥

તદેવ બ્રહ્મ ત્વં વિદ્ધિ નેદં યદિદમુપાસતે ॥ ૬॥

યત્પરં બ્રહ્મ સર્વાત્મા વિશ્વસ્યાયતનં મહત્ ॥ ૭॥

સૂક્ષ્માત્સૂક્ષ્મતરં નિત્યં તત્ત્વમેવ ત્વમેવ તત્ ॥ ૮॥

અન્તઃપૂર્ણો બહિઃપૂર્ણઃ પૂર્ણકુમ્ભ ઇવાર્ણવે ॥ ૯॥

અન્તઃશૂન્યો બહિઃશૂન્યઃ શૂન્યકુમ્ભ ઇવામ્બરે ॥ ૧૦॥

મા ભવગ્રાહ્યભાવાત્મા ગ્રાહકાત્મા ચ મા ભવ ॥ ૧૧॥

ભાવનામખિલાં ત્યક્ત્વા યચ્છિષ્ટં તન્મયો ભવ ॥ ૧૨॥

દ્રષ્ટૃદર્શનદૃશ્યાદિ ત્યક્ત્વા વાસનયા સહ ॥ ૧૩॥

દર્શનપ્રથમાભાસમાત્માનં કેવલં ભજ ॥ ૧૪॥

ચિત્તાકાશં ચિદાકાશમાકાશશ્ચ તૃતીયકમ્ ॥ ૧૫॥

દ્વાભ્યાં શૂન્યતરં વિદ્ધિ ચિદાકાશં મહામુને ॥ ૧૬॥

ધ્યાનતો હૃદયાકાશે ચિતિ ચિચ્ચક્રધારયા ॥ ૧૭॥

મનો મારય નિઃશઙ્કં ત્વાં પ્રબધ્નન્તિ નારયઃ ॥ ૧૮॥

ભોગૈકવાસનાં ત્યક્ત્વા ત્યજ ત્વં ભેદવાસનામ્ ॥ ૧૯॥

ભાવાભાવૌ તતસ્ત્યક્ત્વા નિર્વિકલ્પઃ સ્થિરો ભવ ॥ ૨૦॥

ત્યજ ધર્મમધર્મં ચ ઉભે સત્યાનૃતે ત્યજ ॥ ૨૧॥

ઉભે સત્યાનૃતે ત્યક્ત્વા યેન ત્યજસિ તત્ત્યજ ॥ ૨૨॥

આત્મન્યતીતે સર્વસ્માત્સર્વરૂપેઽથવા તતે ॥ ૨૩॥

કો બન્ધઃ કસ્ય વા મોક્ષો નિર્મૂલં મનનં કુરુ ॥ ૨૪॥

આશા યાતુ નિરાશાત્વમભાવં યાતુ ભાવના ॥ ૨૫॥

અમનસ્ત્વં મનો યાતુ તવાસઙ્ગેન જીવતઃ ॥ ૨૬॥

એકમાદ્યન્તરહિતં ચિન્માત્રમમલં તતમ્ ॥ ૨૭॥

ખાદપ્યતિતરાં સૂક્ષ્મં તદ્બ્રહ્માસિ ન સંશયઃ ॥ ૨૮॥

રક્ષકો વિષ્ણુરિત્યાદિ બ્રહ્મા સૃષ્ટેસ્તુ કારણમ્ ॥ ૨૯॥

સંહારે રુદ્ર ઇત્યેવં સર્વં મિથ્યેતિ નિશ્ચિનુ ॥ ૩૦॥

મત્ત્યક્તં નાસ્તિ કિઞ્ચિદ્વા મત્ત્યક્તા પૃથિવી તુ વા ॥ ૩૧॥

મયાતિરિક્તં યદ્યદ્વા તત્તન્નાસ્તીતિ નિશ્ચિનુ ॥ ૩૨॥

અનાત્મેતિ પ્રસઙ્ગો વા અનાત્મેતિ મનોઽપિ વા ॥ ૩૩॥

અનાત્મેતિ જગદ્વાપિ નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૩૪॥

આદિમધ્યાયસાનેષુ દુઃખં સર્વમિદં યતઃ ॥ ૩૫॥

તસ્માત્સર્વં પરિત્યજ્ય તત્ત્વનિષ્ઠો ભવાનઘ ॥ ૩૬॥

નિદ્રાયા લોકવાર્તાયાઃ શબ્દાદેરાત્મવિસ્મૃતેઃ ॥ ૩૭॥

ક્વચિન્નાવસરં દત્ત્વા ચિન્તયાત્માનમાત્મનિ ॥ ૩૮॥

સર્વવ્યાપારમુત્સૃજ્ય અહં બ્રહ્મેતિ ભાવય ॥ ૩૯॥

અહં બ્રહ્મેતિ નિશ્ચિત્ય ત્વહંભવં પરિત્યજ ॥ ૪૦॥

ઘટાકાશં મહાકાશ ઇવાત્માનં પરાત્મનિ ॥ ૪૧॥

વિલાપ્યાખણ્ડભાવેન તૂષ્ણીં ભવ સદા મુને ॥ ૪૨॥

ચિદિહાસ્તીતિ ચિન્માત્રમિદં ચિન્મયમેવ ચ ॥ ૪૩॥

ચિત્ત્વં ચિદહમેતે ચ લોકાશ્ચિદિતિ ભાવય ॥ ૪૪॥

સત્યચિદ્ઘનમખણ્ડમદ્વયં સર્વદૃશ્યરહિતં નિરામયમ્ ॥ ૪૫॥

યત્પદં વિમલમદ્વયં શિવં તત્સદાહમિતિ મૌનમાશ્રય ॥ ૪૬॥

જન્મમૃત્યુસુખદુઃખવર્જિતં જાતિનીતિકુલગોત્રદૂરગમ્ ॥ ૪૭॥

ચિદ્વિવર્તજગતોઽસ્ય કારણં તત્સદાહમિતિ મૌનમાશ્રય ॥ ૪૮॥

પૂર્ણમદ્વયમખણ્ડચેતનં વિશ્વભેદકલનાદિવર્જિતમ્ ॥ ૪૯॥

અદ્વિતીયપરસંવિદાત્મકં તત્સદાહમિતિ મૌનમાશ્રય ॥ ૫૦॥

સ્વાત્મનોઽન્યતયા ભાતં ચરાચરમિદં જગત્ ॥ ૫૧॥

સ્વાત્મમાત્રતયા બુદ્ધ્વા તદસ્મીતિ વિભાવય ॥ ૫૨॥

વિલાપ્ય વિકૃતિં કૃત્સ્નાં સમ્ભવવ્યત્યયક્રમાત્ ॥ ૫૩॥

પરિશિષ્ટં ચ ચિન્માત્રં ચિદાનન્દં વિચિન્તય ॥ ૫૪॥

ઇતિ સાર્ધાન્તિકોપદેશવાક્યાનિ ચતુઃપઞ્ચાશત્ ॥ ૫૪॥

પઞ્ચમં પ્રકરણં સમાપ્તમ્ ।

---

૬ અથ સાર્ધાન્તિકજીવબ્રહ્મૈક્યવાક્યાનિ । (૩૮)

સ યશ્ચાયં પુરુષે ॥ ૧॥

યશ્ચાસાવાદિત્યે ॥ ૨॥

સ એકઃ ॥ ૩॥

સત્યમાત્મા બ્રહ્મૈવ બ્રહ્માત્મૈવાત્ર હ્યેવ ન વિચિકિત્સ્યમ્ ॥ ૪॥

ત્વં બ્રહ્માસિ ॥ ૫॥

અહં બ્રહ્માસ્મિ ॥ ૬॥

આવયોરન્તરં ન વિદ્યતે ત્વમેવાહમહમેવ ત્વમ્ ॥ ૭॥

ગતાઃ કલાઃ પઞ્ચદશપ્રતિષ્ઠા દેવાશ્ચ સર્વે પ્રતિદેવતાસુ ॥ ૮॥

કર્માણિ વિજ્ઞાનમયશ્ચ આત્મા પરેઽવ્યયે સર્વ એકીભવન્તિ ॥ ૯॥

યેનેયતે શ‍ૃણોતીદં જિઘ્રતિ વ્યાકરોતિ ચ ॥ ૧૦॥

સ્વાદ્વસ્વાદુ વિજાનાતિ તત્પ્રજ્ઞાનમુદીરિતમ્ ॥ ૧૧॥

ચતુર્મુખેન્દ્રદેવેષુ મનુષ્યાશ્વગવાદિષુ ॥ ૧૨॥

ચૈતન્યમેકં બ્રહ્માતઃ પ્રજ્ઞાનં બ્રહ્મ મય્યપિ ॥ ૧૩॥

પરિપૂર્ણઃ પરાત્માસ્મિન્દેહે વિદ્યાધિકારિણિ ॥ ૧૪॥

બુદ્ધેઃ સાક્ષિતયા સ્થિત્વા સ્ફુરન્નહમિતીર્યતે ॥ ૧૫॥

સ્વતઃ પૂર્ણઃ પરાત્માત્ર બ્રહ્મશબ્દેન વર્ણિતઃ ॥ ૧૬॥

અસ્મીત્યૈક્યપરામર્શાત્તેન બ્રહ્મ ભવામ્યહમ્ ॥ ૧૭॥

એકમેવાદ્વિતીયં સન્નામરૂપવિવર્જિતમ્ ॥ ૧૮॥

સૃષ્ટેઃ પુરાધુનાપ્યસ્ય તાદૃક્ ત્વં તદિતીર્યતે ॥ ૧૯॥

શ્રોતુર્દેહેન્દ્રિયાતીતં વસ્ત્વત્ર ત્વંપદેરિતમ્ ॥ ૨૦॥

એકતા ગ્રાહ્યતેઽસીતિ તદૈક્યમનુભૂયતામ્ ॥ ૨૧॥

સ્વપ્રકાશાપરોક્ષત્વમયમિત્યુક્તિતો મતમ્ ॥ ૨૨॥

અહઙ્કારાદિદેહાન્તાત્પ્રત્યગાત્મેતિ ગીયતે ॥ ૨૩॥

દૃશ્યમાનસ્ય સર્વસ્ય જગતસ્તત્ત્વમીર્યતે ॥

બ્રહ્મશબ્દેન તદ્બ્રહ્મ સ્વપ્રકાશાત્મરૂપકમ્ ॥ ૨૫॥

માયાવિદ્યે વિહાયૈવ ઉપાધી પરજીવયોઃ ॥ ૨૬॥

અખણ્ડં સચ્ચિદાનન્દં પરં બ્રહ્મ વિલક્ષ્યતે ॥ ૨૭॥

હકારઃ ખેચરીપ્રોક્તસ્ત્વંપદં ચેતિ નિશ્ચિતમ્ ॥ ૨૮॥

સકારઃ પરમેશઃ સ્યાત્તત્પદં ચેતિ નિશ્ચિતમ્ ॥ ૨૯ ॥

સકારો ધ્યાયતે જન્તુર્હકારો હિ ભવેદ્ધ્રુવમ્ ॥ ૩૦ ॥

આદ્યો રા તત્પદાર્થઃ સ્યાન્મકારસ્ત્વંપદાર્થવાન્ ॥ ૩૧ ॥

તયોઃ સંયોજનમસીત્યર્થે તત્ત્વવિદો વિદુઃ ॥ ૩૨ ॥

નમસ્ત્વમર્થો વિજ્ઞેયો રામસ્તત્પદમુચ્યતે ॥ ૩૩ ॥

અસીત્યર્થે ચતુર્થી સ્યાદેવં મન્ત્રેષુ યોજયેત્ ॥ ૩૪ ॥

ક્ષીરં ક્ષીરે યથા ક્ષિપ્તં તૈલં તૈલે જલં જલે ॥ ૩૫ ॥

સંયુક્તમેકતાં યાતિ તથાત્મન્યાત્મવિન્મુનિઃ ॥ ૩૬ ॥

ઘટે નષ્ટે યથા વ્યોમ વ્યોમૈવ ભવતિ સ્વયમ્ ॥ ૩૭ ॥

તથૈવોપાધિવિલયે બ્રહ્મૈવ બ્રહ્મવિત્સ્વયમ્ ॥ ૩૮ ॥

ઇતિ સાર્ધાન્તિકજીવબ્રહ્મૈક્યવાક્યાન્યષ્ટત્રિંશત્ ॥ ૩૮ ॥

ષષ્ઠં પ્રકરણં સમાપ્તમ્ ।

## ૭ અથ સાર્ધાન્તિકમનનવાક્યાનિ । (૩૯)

અહમન્નમહમન્નમહમન્નમ્ ॥ ૧ ॥

અહમન્નાદોઽહમન્નાદોઽહમન્નાદઃ ॥ ૨ ॥

અહં મનુરભવં સૂર્યશ્ચ ॥ ૩ ॥

અહમેવેદં સર્વમસાનિ ॥ ૪ ॥

યથા ફેનતરઙ્ગાદિ સમુદ્રાદુત્થિતં પુનઃ ॥ ૫ ॥

સમુદ્રે લીયતે તદ્વજ્જગન્મય્યનુલીયતે ॥ ૬ ॥

અનાત્મદૃષ્ટેરવિવેકનિદ્રામહંમમસ્વપ્નગતિં ગતોઽહમ્ ॥ ૭ ॥

સ્વરૂપસૂર્યેઽભ્યુદિતે સ્ફુટોક્તૈર્ગુરોર્મહાવાક્યપદૈઃ પ્રબુદ્ધઃ ॥ ૮ ॥

પ્રાણાશ્ચલન્તુ તદ્ધર્મૈઃ કામૈર્વા હન્યતાં મનઃ ॥ ૯ ॥

આનન્દબુદ્ધિપૂર્ણસ્ય મમ દુઃખં કથં ભવેત્ ॥ ૧૦ ॥

ન મે બન્ધો ન મે મુક્તિર્ન મે શાસ્ત્રં ન મે ગુરુઃ ॥ ૧૧ ॥

માયામાત્રવિકાસત્વાન્માયાતીતોઽહમદ્વયઃ ॥ ૧૨॥

આત્માનમઞ્જસા વેદ્મિ ક્વાપ્યજ્ઞાનં પલાયિતમ્ ॥ ૧૩॥

કર્તૃત્વમપિ મે નષ્ટં કર્તવ્યં વાપિ ન ક્વચિત્ ॥ ૧૪॥

બ્રાહ્મણ્યં કુલગોત્રે ચ નામસૌન્દર્યજાતયઃ ॥ ૧૫॥

સર્વે સ્થૂલદેહગતા હ્યેતે સ્થૂલાદ્ભિન્નસ્ય મે ન હિ ॥ ૧૬॥

ક્ષુત્પિપાસાન્ધ્યબાધિર્યકામક્રોધાદયોઽખિલાઃ ॥ ૧૭॥

લિઙ્ગદેહગતા હ્યેતે હ્યલિઙ્ગસ્ય ન વિદ્યતે ॥ ૧૮॥

જડત્વપ્રિયમોદત્વધર્માઃ કારણદેહગાઃ ॥ ૧૯॥

ન સન્તિ મમ નિત્યસ્ય નિર્વિકારસ્વરૂપિણઃ ॥ ૨૦॥

ચિદ્રૂપત્વાન્ન મે જાડ્યં સત્યત્વાન્નાનૃતં મમ ॥ ૨૧॥

આનન્દત્વાન્ન મે દુઃખમજ્ઞાનાદ્ભાતિ સત્યવત્ ॥ ૨૨॥

નાહં દેહો જન્મમૃત્યૂ કુતો મે નાહં પ્રાણઃ ક્ષુત્પિપાસે કુતો મે ॥ ૨૩॥

નાહં ચેતઃ શોકમોહૌ કુતો મે નાહં કર્તા બન્ધમોક્ષૌ કુતો મે ॥ ૨૪॥

આનન્દમન્તર્નિજમાશ્રયન્તમાશાપિશાચીમવમાનયન્તમ્ ॥ ૨૫॥

આલોકયન્તં જગદિન્દ્રજાલમાપત્કથં માં પ્રવિશેદસઙ્ગમ્ ॥ ૨૬॥

દેવાર્ચનસ્નાનશૌચભિક્ષાદૌ વર્તતાં વપુઃ ॥ ૨૭॥

તારં જપતુ વાક્ તદ્વત્પઠત્વામ્નાયમસ્તકમ્ ॥ ૨૮॥

વિષ્ણું ધ્યાયેત ધીર્યદ્વા બ્રહ્માનન્દે વિલીયતામ્ ॥ ૨૯॥

સાક્ષ્યહં કિઞ્ચિદપ્યત્ર ન કુર્વે નાપિ કારયે ॥ ૩૦॥

જ્ઞાતં જ્ઞાતવ્યમધુના દૃષ્ટં દ્રષ્ટવ્યમદ્ભુતમ્ ॥ ૩૧॥

વિશ્રાન્તોઽસ્મિ ચિરં શ્રાન્તશ્ચિન્માત્રાન્નાસ્તિ કિઞ્ચન ॥ ૩૨॥

ન ભૂતં ન ભવિષ્યં ચ ચિન્તયામિ કદાચન ॥ ૩૩॥

ન સ્તૌમિ ન ચ નિન્દામિ હ્યાત્મનોઽન્યન્નહિ ક્વચિત્ ॥ ૩૪॥

અલેપકોઽહમજરો નીરાગઃ શાન્તવાસનઃ ॥ ૩૫॥

સ્વપૂર્ણાત્માતિરેકેણ જગજ્જીવેશ્વરાદયઃ ॥ ૩૬॥

ન સન્તિ નાસ્તિ માયા ચ તેભ્યશ્ચાહં વિલક્ષણઃ ॥ ૩૭॥

કિં કરોમિ ક્વ ગચ્છામિ કિં ગૃહ્ણામિ ત્યજામિ કિમ્ ॥ ૩૮॥

યન્મયા પૂરિતં વિશ્વં મહાકલ્પામ્બુના યથા ॥ ૩૯॥

ઇતિ સાર્ધાન્તિકમનનવાક્યાન્યેકોનચત્વારિંશત્ ॥ ૩૯॥

સપ્તમં પ્રકરણં સમાપ્તમ્ ।

---

૮ અથ સાર્ધાન્તિકજીવન્મુક્તિવાક્યાનિ । (૧૧૯)

સ તત્ર પર્યેતિ જક્ષત્ક્રીડન્ રમમાણઃ સ્ત્રીભિર્વા યાનૈર્વા
જ્ઞાતિભિર્વા વયસ્યૈર્વા નોપજનં સ્મરન્નિદં શરીરમ્ ॥ ૧॥

સ વા એષ એવં પશ્યન્નેવં મન્વાન એવં વિજાનન્નાત્મરતિ-
રાત્મક્રીડઃ આત્મમિથુન આત્માનન્દઃ સ્વરાડ્ ભવતિ ॥ ૨॥

તે દેવાઃ પુત્રૈષણાયાશ્ચ વિત્તૈષણાયાશ્ચ લોકૈષણાયાશ્ચ
સસાધનેભ્યો વ્યુત્થાય નિરાગારા નિષ્પરિગ્રહા અશિખા અયજ્ઞોપવીતા
અન્ધા બધિરા મુગ્ધાઃ ક્લીબા મૂકા ઉન્મત્તા ઇવ પરિવર્તમાનાઃ શાન્તા
દાન્તા ઉપરતાસ્તિતિક્ષવઃ । સમાહિતા આત્મરતય આત્મક્રીડા આત્મમિથુના
આત્માનન્દાઃ પ્રણવમેવ પરં બ્રહ્માત્મપ્રકાશં શૂન્યં
જાનન્તસ્તત્રૈવ પરિસમાપ્તાઃ ॥ ૩॥

કુચેલોઽસહાય એકાકી સમાધિસ્થ આત્મકામ આપ્તકામો નિષ્કામો
જીર્ણકામો હસ્તિનિ સિંહે દંશે
મશકે નકુલે સપરાક્ષસગન્ધર્વેષુ મૃત્યો રૂપાણિ વિદિત્વા ન
બિભેતિ કુતશ્ચનેતિ ॥ ૪॥

સર્વધર્માન્ પરિત્યજ્ય નિર્મમો નિરહઙ્કારો ભૂત્વા બ્રહ્મિષ્ઠં
શરણમુપગમ્યતત્ત્વમસિ સર્વં ખલ્વિદં બ્રહ્મ નેહ નાનાસ્તિ
કિઞ્ચનેત્યાદિ મહાવાક્યાર્થાનુભવજ્ઞાનાદ્બ્રહ્મૈવાહમસ્મીતિ નિશ્ચિત્ય
નિર્વિકલ્પસમાધિના સ્વતન્ત્રો યતિશ્ચરતિ સ સંન્યાસી સ મુક્તઃ સ પૂજ્યઃ
સ યોગી સ પરમહંસઃ સોઽવધૂતઃ સ બ્રાહ્મણ ઇતિ ॥ ૫॥

જીવઃ પઞ્ચવિંશકઃ સ્વકલ્પિતચતુર્વિંશતિતત્ત્વં પરિત્યજ્ય

ષડ્વિંશકપરમાત્માહમિતિ નિશ્ચયાજ્જીવન્મુક્તો ભવતિ ॥ ૬॥

તુરીયમક્ષરમિતિ જ્ઞાત્વા જાગરિતે સુષુપ્ત્યવસ્થાપન્ન ઇવ યદ્યચ્છ્રુતં યદ્યદ્દૃષ્ટં તત્સર્વમવિજ્ઞાતમિવ યો વસેત્તસ્ય સ્વપ્નાવસ્થાયામપિ તાદૃગવસ્થા ભવતિ સ જીવન્મુક્તો ભવતિ ॥ ૭॥

સકૃદ્વિભાતસદાનન્દાનુભવૈકગોચરો બ્રહ્મવિદ્વિદ્વાંશ્ચક્ષુરાદિ બાહ્યપ્રપઞ્ચોપરતઃ સર્વં જગદાત્મત્વેન પશ્યન્નાત્મેતિ ભાવયન્ કૃતકૃત્યો ભવતિ ॥ ૮॥

નિર્દ્વન્દ્વઃ સદાઽચઞ્ચલગાત્રઃ પરમશાન્તિં સ્વીકૃત્ય નિત્યશુદ્ધઃ પરમાત્માહમેવેત્યખણ્ડાનન્દઃ પૂર્ણઃ કૃતાર્થઃ પરિપૂર્ણપરમાકાશમગ્નમનાઃ પ્રાપ્તોન્મન્યવસ્થઃ સન્ન્યસ્તસર્વેન્દ્રિયવર્ગોઽનેકજન્માર્જિતપુણ્યપુઞ્જપરિપક્વ- કૈવલ્યફલોઽખણ્ડાનન્દનિરસ્તસર્વક્લેશકશ્મલો બ્રહ્માહમસ્મીતિ કૃત કૃત્યો ભવતિ ॥ ૯॥

બ્રહ્મૈવાહમસ્મીત્યનવરતં બ્રહ્મપ્રણવાનુસન્ધાનેન યઃ કૃતકૃત્યો ભવતિ સ પરમહંસપરિવ્રાટ્ ॥ ૧૦॥

ભાવાભાવકલાવિનિર્મુક્તઃ સર્વસંશયધ્વસ્તઃ પૂર્ણાહંભાવઃ કૃતકૃત્યો ભવતિ ॥ ૧૧॥

પ્રાણો હ્યેષ સર્વભૂતૈર્વિભાતિ વિજાનન્વિદ્વાન્ભવતે નાતિવાદી ॥ ૧૨॥

આત્મક્રીડ આત્મરતિઃ ક્રિયાવાનેષ બ્રહ્મવિદાં વરિષ્ઠઃ ॥ ૧૩॥

નિમિષાર્ધં ન તિષ્ઠન્તિ વૃત્તિં બ્રહ્મમયીં વિના ॥

યથા તિષ્ઠન્તિ બ્રહ્માદ્યાઃ સનકાદ્યાઃ શુકાદયઃ ॥ ૧૫॥

અધ્યાત્મરતિરાસીનો નિરપેક્ષો નિરાશિષઃ ॥ ૧૬॥

સર્વદ્વન્દ્વૈર્વિનિર્મુક્તો બ્રહ્મણ્યેવાવતિષ્ઠતે ॥ ૧૭॥

કપાલં વૃક્ષમૂલાનિ કુચેલાન્યસહાયતા ॥ ૧૮॥

સમતા ચૈવ સર્વસ્મિન્નેતન્મુક્તસ્ય લક્ષણમ્ ॥ ૧૯॥

સ્વપ્નેઽપિ યોઽભિયુક્તઃ સ્યાજ્જાગ્રતીવ વિશેષતઃ ॥ ૨૦॥

ઈદૃક્ચેષ્ટઃ સ્મૃતઃ શ્રેષ્ઠો વરિષ્ઠો બ્રહ્મવાદિનામ્ ॥ ૨૧॥

નિર્માનશ્ચાનહઙ્કારો નિર્દ્વન્દ્વશ્છિન્નસંશયઃ ॥ ૨૨॥

આત્મક્રીડ આત્મરતિરાત્મવાન્ સમદર્શનઃ ॥ ૨૩॥

સ્મૃત્વા સ્પૃષ્ટ્વા ચ ભુક્ત્વા ચ દૃષ્ટ્વા જ્ઞાત્વા શુભાશુભમ્ ॥ ૨૪॥

ન હૃષ્યતિ ગ્લાયતિ યઃ સ શાન્ત ઇતિ કથ્યતે ॥ ૨૫॥

અપ્રાપ્તં હિ પરિત્યજ્ય સમ્પ્રાપ્તે સમતાં ગતઃ ॥ ૨૬॥

અદૃષ્ટખેદાખેદો યઃ સન્તુષ્ટ ઇતિ કથ્યતે ॥ ૨૭॥

નાકૃતેન કૃતેનાર્થો ન શ્રુતિસ્મૃતિવિભ્રમૈઃ ॥ ૨૮॥

નિર્મન્થન ઇવામ્ભોધિઃ સ તિષ્ઠતિ યથા સ્થિતઃ ॥ ૨૯॥

સમ્યગ્જ્ઞાનાવબોધેન નિત્યમેકસમાધિના ॥ ૩૦॥

સાઙ્ખ્ય એવાવબુદ્ધા યે તે સાઙ્ખ્યા યોગિનઃ સ્મૃતાઃ ॥ ૩૧॥

પ્રાણાદ્યનિલસંશાન્તૌ યુક્ત્યા યે પદમાગતાઃ ॥ ૩૨॥

અનામયમનાદ્યન્તં તે સ્મૃતા યોગયોગિનઃ ॥ ૩૩॥

સુખદુઃખદશાધીરં સામ્યાન્ન પ્રોદ્ધરન્તિ યમ્ ॥ ૩૪॥

નિઃશ્વાસા ઇવ શૈલેન્દ્રં ચિત્તં તસ્ય મૃતં વિદુઃ ॥ ૩૫॥

વાચામતીતવિષયો વિષયાશાદશોજ્ઝિતઃ ॥ ૩૬॥

પરાનન્દરસાક્ષુબ્ધો રમતે સ્વાત્મનાત્મનિ ॥ ૩૭॥

નિર્ગ્રન્થિઃ શાન્તસન્દેહો જીવન્મુક્તો વિભાવનઃ ॥ ૩૮॥

અનિર્વાણોઽપિ નિર્વાણશ્ચિત્રપ્રદીપ ઇવ સ્થિતઃ ॥ ૩૯॥

નિર્ધનોઽપિ સદા તુષ્ટોઽપ્યસહાયો મહાબલઃ ॥ ૪૦॥

નિત્યતૃપ્તોઽપ્યભુઞ્જાનોઽપ્યસમઃ સમદર્શનઃ ॥ ૪૧॥

કુર્વન્નપિ ન કુર્વાણશ્ચાભોક્તા ફલભોગ્યપિ ॥ ૪૨॥

શરીર્યપ્યશરીરોઽસૌ પરિચ્છિન્નોઽપિ સર્વગઃ ॥ ૪૩॥

અધ્યાત્મરતિરાસીનઃ પૂર્ણઃ પાવનમાનસઃ ॥ ૪૪॥

નૈષ્કર્મણ્યેન ન તસ્યાર્થસ્તસ્યાર્થોઽસ્તિ ન કર્મભિઃ ॥ ૪૫॥

ન સમાધાનજાપ્યાભ્યાં યસ્ય નિર્વાસનં મનઃ ॥ ૪૬॥

જગજ્જીવાદિરૂપેણ પશ્યન્નપિ પરાત્મવિત્ ॥ ૪૭॥

ન તત્પશ્યતિ ચિદ્રૂપં બ્રહ્મ વસ્ત્વેવ પશ્યતિ ॥ ૪૮॥

અહમન્નં સદાન્નાદ ઇતિ હિ બ્રહ્મવેદનમ્ ॥ ૪૯॥

બ્રહ્મવિદ્ગ્રસતિ જ્ઞાનાત્ સર્વં બ્રહ્માત્મનૈવ તુ ॥ ૫૦॥

સમાધિમથકર્માણિ મા કરોતુ કરોતુ વા ॥ ૫૧॥

હૃદયેનાત્તસર્વેહો મુક્ત એવોત્તમાશયઃ ॥ ૫૨॥

અક્ષરત્વાદ્વરેણ્યત્વાદ્વ્યસ્તસંસારબન્ધનાત્ ॥ ૫૩॥

તત્ત્વમસ્યાદિલક્ષ્યત્વાદવધૂત ઇતીર્યતે ॥ ૫૪॥

યો વિલઙ્ઘ્યાશ્રમાન્વર્ણાનાત્મન્યેવ સ્થિતઃ પુમાન્ ॥ ૫૫॥

અતિવર્ણાશ્રમી યોગી અવધૂતઃ સ કથ્યતે ॥ ૫૬॥

યથા રવિઃ સર્વરસાન્પ્રભુઙ્ક્તે હુતાશનશ્ચાપિ હિ સર્વભક્ષઃ ॥ ૫૭॥

તથૈવ યોગી વિષાયન્પ્રભુઙ્ક્તે ન લિપ્યતે પુણ્યપાપૈશ્ચ શુદ્ધઃ ॥ ૫૮॥

કેવલં સુસમઃ સ્વચ્છો મૌની મુદિતમાનસઃ ॥ ૫૯॥

સન્તોષામૃતપાનેન યે શાન્તાસ્તૃપ્તિમાગતાઃ ॥ ૬૦॥

આત્મારામા મહાત્માનસ્તે મહાપદમાગતાઃ ॥ ૬૧॥

હર્ષામર્ષભયક્રોધકામકાર્પણ્યદૃષ્ટિભિઃ ॥ ૬૨॥

ન હૃષ્યતિ ગ્લાયતિ યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૬૩॥

અહઙ્કારમયીં ત્યક્ત્વા વાસનાં લીલયૈવ યઃ ॥ ૬૪॥

તિષ્ઠતિ ધ્યેયસન્ત્યાગી સ જીવન્મુક્ત ઉચ્યતે ॥ ૬૫॥

મૌનવાન્નિરહંભાવો નિર્માનો મુક્તમત્સરઃ ॥ ૬૬॥

યઃ કરોતિ ગતોદ્વેગઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૬૭॥

યાવતી દૃશ્યકલના સકલેયં વિલોક્યતે ॥ ૬૮॥

સા યેન સુષ્ઠુ સન્ત્યક્તા સ જીવન્મુક્ત ઉચ્યતે ॥ ૬૯॥

ઉદ્વેગાનન્દરહિતઃ સમયા સ્વચ્છયા ધિયા ॥ ૭૦॥

ન શોચતે ન ચોદેતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૭૧॥

સર્વેચ્છાઃ સકલાઃ શઙ્કાઃ સર્વેહાઃ સર્વનિશ્ચયાઃ ॥ ૭૨॥

ધિયા યેન પરિત્યક્તાઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૭૩॥

જન્મસ્થિતિવિનાશેષુ સોદયાસ્તમયેષુ ચ ॥ ૭૪॥

સમમેવ મનો યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૭૫॥

સર્વાધિષ્ઠાનચિન્માત્રે નિર્વિકલ્પે ચિદાત્મનિ ॥ ૭૬॥

યો જીવતિ ગતસ્નેહઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૭૭॥

ક્રિયાનાશાદ્ભવેચ્ચિન્તાનાશોઽસ્માદ્વાસનાક્ષયઃ ॥ ૭૮॥

વાસનાપ્રક્ષયો મોક્ષઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૭૯॥

નિર્વિકલ્પા ચ ચિન્માત્રા વૃત્તિઃ પ્રજ્ઞેતિ કથ્યતે ॥ ૮૦॥

સા સર્વદા ભવેદ્યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૮૧॥

દેહેન્દ્રિયેષ્વહંભાવ ઇદંભાવસ્તદન્યકે ॥ ૮૨॥

યસ્ય નો ભવતઃ ક્વાપિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૮૩॥

ન પ્રત્યગ્બ્રહ્મણોર્ભેદં કદાપિ બ્રહ્મસર્ગયોઃ ॥ ૮૪॥

પ્રજ્ઞયા યો વિજાનાતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૮૫॥

સાધુભિઃ પૂજ્યમાનોઽપિ પીડ્યમાનોઽપિ દુર્જનૈઃ ॥ ૮૬॥

સમમેવ ભવેદ્યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૮૭॥

યથાસ્થિતમિદં યસ્ય વ્યવહારવતોઽપિ ચ ॥ ૮૮॥

અસ્તં ગતં સ્થિતં વ્યોમ સ જીવન્મુક્ત ઉચ્યતે ॥ ૮૯॥

નોદેતિ નાસ્તમાયાતિ સુખે દુઃખે મનઃપ્રભા ॥ ૯૦॥

યથા પ્રાપ્તસ્થિતિર્યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૧॥

યો જાગર્તિ સુષુપ્તિસ્થો યસ્ય જાગ્રન્નવિદ્યતે ॥ ૯૨॥

યસ્ય નિર્વાસનો બોધઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૩॥

રાગદ્વેષભયાદીનામનુરૂપં ચરન્નપિ ॥ ૯૪॥

યોઽન્તર્વ્યોમવદત્યચ્છઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૫॥

યસ્ય નાહઙ્કૃતો ભાવો બુદ્ધિર્યસ્ય ન લિપ્યતે ॥ ૯૬॥

કુર્વતોઽકુર્વતો વાપિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૭॥

યસ્માન્નોદ્વિજતે લોકો લોકાન્નોદ્વિજતે ચ યઃ ॥ ૯૮॥

હર્ષામર્ષભયોન્મુક્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૯॥

યઃ સમસ્તાર્થજાલેષુ વ્યવહાર્યપિ શીતલઃ ॥ ૧૦૦॥

પરાર્થેષ્વિવ પૂર્ણાત્મા સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૦૧॥

પ્રજહાતિ યદા કામાન્સર્વાંશ્ચિત્તગતાન્મુને ॥ ૧૦૨॥

મયિ સર્વાત્મકે તુષ્ટઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૦૩॥

ચૈત્યવર્જિતચિન્માત્રે પદે પરમપાવને ॥ ૧૦૪॥

અક્ષુબ્ધચિત્તો વિશ્રાન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૦૫॥

ઇદં જગદયં સોઽહં દૃશ્યજાતમવાસ્તવમ્ ॥ ૧૦૬॥

યસ્ય ચિત્તે ન સ્ફુરતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૦૭॥

શાન્તસંસારકલનઃ કલાવાનપિ નિષ્કલઃ ॥ ૧૦૮॥

યઃ સચિત્તોઽપિ નિશ્ચિત્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૦૯॥

ચિદાત્માહં પરાત્માહં નિર્ગુણોઽહં પરાત્પરઃ ॥ ૧૧૦॥

આત્મમાત્રેણ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧૧॥

દેહત્રયાતિરિક્તોઽહં શુદ્ધચૈતન્યમસ્મ્યહમ્ ॥ ૧૧૨॥

બ્રહ્માહમિતિ યસ્યાન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧૩॥

યસ્ય દેહાદિકં નાસ્તિ યસ્ય બ્રહ્મેતિ નિશ્ચયઃ ॥ ૧૧૪॥

પરમાનન્દપૂર્ણો યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧૫॥

નિત્યાનન્દઃ પ્રસન્નાત્મા હ્યન્યચિન્તાવિવર્જિતઃ ॥ ૧૧૬॥

કિઞ્ચિદસ્તિત્વહીનો યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧૭॥

અહં બ્રહ્માસ્મ્યહં બ્રહ્માસ્મ્યહં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૧૧૮॥

ચિદહં ચિદહં ચેતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧૯॥

ઇતિ જીવન્મુક્તિવાક્યાન્યેકોનવિંશત્યધિકં શતમ્ ॥ ૧૧૯॥

અષ્ટમં પ્રકરણં સમાપ્તમ્ ।

---

૯ અથ સાર્ધાન્તિકસ્વાનુભૂતિવાક્યાનિ । (૧૧૮)

યોઽસાવસૌ પુરુષઃ સોઽહમસ્મિ ॥ ૧॥

તદ્યોઽહં સોઽસૌ યોઽસૌ સોઽહમ્ ॥ ૨॥

તં શાન્તમચલમદ્વયાનન્દચિદ્ઘન એવાસ્મિ ॥ ૩॥

તત્પૂર્ણાનન્દૈકબોધસ્તદ્બ્રહ્મૈવાહમસ્મિ ॥ ૪॥

ત્વં વાહમસ્મિ ભગવો દેવ તેઽહં વૈ ત્વમસિ ॥ ૫॥

સચ્ચિદાનન્દાત્મકોઽહમજોઽહં પરિપૂર્ણોઽહમસ્મિ ॥ ૬॥

શુદ્ધાદ્વૈતબ્રહ્માહમ્ ॥ ૭॥

વાચામગોચરનિરાકારપરબ્રહ્મસ્વરૂપોઽહમેવ ॥ ૮॥

સદોજ્જ્વલોઽવિદ્યાતત્કાર્યહીનઃ સ્વાત્મા બન્ધહરઃ સર્વદા દ્વૈતરહિત
આનન્દરૂપઃ સર્વાધિષ્ઠાનસન્માત્રો નિરસ્તાવિદ્યાતમોમોહોઽહમેવાહમોં
તદ્યત્પરં બ્રહ્મ રામચન્દ્રશ્ચિદાત્મકઃ સોઽહમોં તદ્રામભદ્રઃ
પરં જ્યોતી રસોઽહમોમ્ ॥ ૯॥

તત્પરઃ પરમપુરુષઃ પુરાણપુરુષોત્તમો નિત્યશુદ્ધબુદ્ધમુક્તસત્ય-
પરમાનન્દાનન્તાદ્વયપરિપૂર્ણઃ પરમાત્મા બ્રહ્મૈવાહં રામોઽસ્મિ ॥ ૧૦॥

ત્રિષુ ધામસુ યદ્ભોજ્યં ભોક્તા ભોગશ્ચ યદ્ભવેત્ ॥ ૧૧॥

તેભ્યો વિલક્ષણઃ સાક્ષી ચિન્માત્રોઽહં સદાશિવઃ ॥ ૧૨॥

મય્યેવ સકલં જાતં મયિ સર્વં પ્રતિષ્ઠિતમ્ ॥ ૧૩॥

મયિ સર્વં લયં યાતિ તદ્બ્રહ્માદ્વયમસ્મ્યહમ્ ॥ ૧૪॥

નિર્વાણોઽસ્મિ નિરીહોઽસ્મિ નિરંશોઽસ્મિ નિરીપ્સિતઃ ॥ ૧૫॥

ચિદાત્માઽસ્મિ નિરંશોઽસ્મિ પરાપરવિવર્જિતઃ ॥ ૧૬॥

બ્રહ્મૈવાહં સર્વવેદાન્તવેદ્યં નાહં વેદ્યં વ્યોમવાતાદિરૂપમ્ ॥ ૧૭॥

રૂપં નાહં નામ નાહં ન કર્મ બ્રહ્મૈવાહં સચ્ચિદાનન્દરૂપમ્ ॥ ૧૮॥

નિત્યઃ શુદ્ધો બુદ્ધમુક્તસ્વભાવઃ સત્યઃ સૂક્ષ્મઃ
સન્વિભુશ્ચાદ્વિતીયઃ ॥ ૧૯॥

આનન્દાબ્ધિર્યત્પરઃ સોઽહમસ્મિ પ્રત્યગ્ધાતુર્નાત્ર સંશીતિરસ્તિ ॥ ૨૦॥

સોઽહમર્કઃ પરં જ્યોતિરર્કજ્યોતિરહં શિવઃ ॥ ૨૧॥

આત્મજ્યોતિરહં શુક્રઃ સર્વજ્યોતિરસાવહોમ્ ॥ ૨૨॥

દ્વૈતભાવવિમુક્તોઽસ્મિ સચ્ચિદાનન્દલક્ષણઃ ॥ ૨૩॥

શુદ્ધબોધસ્વરૂપોઽહં કેવલોઽહં સદાશિવઃ ॥ ૨૪॥

નિષ્ક્રિયોઽસ્મ્યવિકારોઽસ્મિ નિર્ગુણોઽસ્મિ નિરાકૃતિઃ ॥ ૨૫॥

નિર્વિકલ્પોઽસ્મિ નિત્યોઽસ્મિ નિરાલમ્બોઽસ્મિ નિર્દ્વયઃ ॥ ૨૬॥

કેવલાખણ્ડબોધોઽહં સ્વાનન્દોઽહં નિરન્તરઃ ॥ ૨૭॥

સત્યં જ્ઞાનમનન્તં યત્પરં બ્રહ્માહમેવ તત્ ॥ ૨૮॥

કેવલં ચિત્સદાનન્દં બ્રહ્મૈવાહં જનાર્દનઃ ॥ ૨૯॥

અશુભાશુભસઙ્કલ્પૈઃ સંશાન્તોઽસ્મિ નિરામયઃ ॥ ૩૦॥

નષ્ટેષ્ટાનિષ્ટકલનઃ સંવિન્માત્રપરોઽસ્મ્યહમ્ ॥ ૩૧॥

અન્તર્યામ્યહમગ્રાહ્યોઽનિર્દેશ્યોઽહમલક્ષણઃ ॥ ૩૨॥

અદ્વૈતોઽહં પૂર્ણોઽહમબાહ્યોઽહમનન્તરઃ ॥ ૩૩॥

અદ્વયાનન્દવિજ્ઞાનઘનોઽસ્મ્યહમવિક્રિયઃ ॥ ૩૪॥

અવિદ્યાકાર્યહીનોઽહમવાઙ્મનસગોચરઃ ॥ ૩૫॥

આત્મચૈતન્યરૂપોઽહમહમાનન્દચિદ્ઘનઃ ॥ ૩૬॥

આપ્તકામોઽહમાકાશાત્પરમાત્મેશ્વરોઽસ્મ્યહમ્ ॥ ૩૭॥

ચિદાનન્દોઽસ્મ્યહં ચેતા ચિદ્ઘનશ્ચિન્મયોઽસ્મ્યહમ્ ॥ ૩૮॥

જ્યોતિર્મયોઽસ્મ્યહં જ્યાયાજ્જ્યોતિષાં જ્યોતિરસ્મ્યહમ્ ॥ ૩૯॥

નિત્યોઽહં નિરવદ્યોઽહં નિષ્ક્રિયોઽમિ નિરઞ્જનઃ ॥ ૪૦॥

નિર્મલો નિર્વિકલ્પોઽહં નિરાખ્યાતોઽસ્મિ નિશ્ચલઃ ॥ ૪૧॥

નિર્વિકારો નિત્યપૂતો નિર્ગુણો નિસ્પૃહોઽસ્મ્યહમ્ ॥ ૪૨॥

નિરિન્દ્રિયો નિયન્તાહં નિરપેક્ષોઽસ્મિ નિષ્કલઃ ॥ ૪૩॥

પુરુષઃ પરમાત્માહં પુરાણઃ પરમોઽસ્મ્યહમ્ ॥ ૪૪॥

પૂર્ણાનન્દૈકબોધોઽહં પ્રત્યગેકરસોઽસ્મ્યહમ્ ॥ ૪૫॥

પ્રજ્ઞાતોઽહં પ્રશાન્તોઽહં પ્રકાશઃ પરમેશ્વરઃ ॥ ૪૬॥

એકધા ચિન્ત્યમાનોઽહં દ્વૈતાદ્વૈતવિલક્ષણઃ ॥ ૪૭॥

શુદ્ધોઽસ્મિ શુક્રઃ શાન્તોઽસ્મિ શાશ્વતોઽસ્મિ શિવોઽસ્મ્યહમ્ ॥ ૪૮॥

અહં સકૃદ્વિભાતોઽસ્મિ સ્વે મહિમ્નિ સદા સ્થિતઃ ॥ ૪૯॥

માનાવમાનહીનોઽસ્મિ નિર્ગુણોઽસ્મિ શિવોઽસ્મ્યહમ્ ॥ ૫૧॥

દ્વૈતાદ્વૈતવિહીનોઽસ્મિ દ્વન્દ્વહીનોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૫૨॥

ભાવાભાવવિહીનોઽસ્મિ ભાષાહીનોઽસ્મિ ભાસ્મ્યહમ્ ॥ ૫૩॥

શૂન્યાશૂન્યવિહીનોઽસ્મિ શોભનાશોભનોઽસ્મ્યહમ્ ॥ ૫૪॥

સદસદ્ભેદહીનોઽસ્મિ સઙ્કલ્પરહિતોઽસ્મ્યહમ્ ॥ ૫૫॥

નાનાત્મભેદહીનોઽસ્મિ હ્યખણ્ડાનન્દવિગ્રહઃ ॥ ૫૬॥

બન્ધમોક્ષવિહીનોઽસ્મિ શુદ્ધં બ્રહ્માસ્મિ સોઽસ્મ્યહમ્ ॥ ૫૭॥

ચિત્તાદિસર્વહીનોઽસ્મિ પરમોઽસ્મિ પરાત્પરઃ ॥ ૫૮॥

સદા વિચારરૂપોઽસ્મિ નિર્વિચારોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૫૯॥

ધ્યાતૃધ્યાનવિહીનોઽસ્મિ ધ્યેયહીનોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૬૦॥

લક્ષ્યાલક્ષ્યવિહીનોઽસ્મિ લયહીનરસોઽસ્મ્યહમ્ ॥ ૬૧॥

માતૃમાનવિહીનોઽસ્મિ મેયહીનઃ શિવોઽસ્મ્યહમ્ ॥ ૬૨॥

સર્વેન્દ્રિયવિહીનોઽસ્મિ સર્વકર્મકૃદપ્યહમ્ ॥ ૬૩॥

મુદિતામુદિતાખ્યોઽસ્મિ સર્વમૌનફલોઽસ્મ્યહમ્ ॥ ૬૪॥

ષડ્વિકારવિહીનોઽસ્મિ ષટ્કોશરહિતોઽસ્મ્યહમ્ ॥ ૬૫॥

દેશકાલવિમુક્તોऽસ્મિ દિગમ્બરસુખોऽસ્મ્યહમ્ ॥ ૬૬॥

અખણ્ડાકાશરૂપોऽસ્મિ હ્યખણ્ડાકારમસ્મ્યહમ્ ॥ ૬૭॥

પ્રપઞ્ચમુક્તચિત્તોऽસ્મિ પ્રપઞ્ચરહિતોऽસ્મ્યહમ્ ॥ ૬૮॥

સર્વપ્રકાશરૂપોऽસ્મિ ચિન્માત્રજ્યોતિરસ્મ્યહમ્ ॥ ૬૯॥

કાલત્રયવિમુક્તોऽસ્મિ કામાદિરહિતોऽસ્મ્યહમ્ ॥ ૭૦॥

મુક્તિહીનોऽસ્મિ મુક્તોऽસ્મિ મોક્ષહીનોऽસ્મ્યહમ્ સદા ॥ ૭૧॥

ગન્તવ્યદેશહીનોऽસ્મિ ગમનાદિવિવર્જિતઃ ॥ ૭૨॥

સર્વદા સમરૂપોऽસ્મિ શાન્તોऽસ્મિ પુરુષોત્તમઃ ॥ ૭૩॥

ચિદક્ષરોऽહં સત્યોऽહં વાસુદેવોऽજરોऽમરઃ ॥ ૭૪॥

અહમેવાક્ષરં બ્રહ્મ વાસુદેવાખ્યમદ્વયમ્ ॥ ૭૫॥

પરબ્રહ્મસ્વરૂપોऽહં પરમાનન્દમસ્મ્યહમ્ ॥ ૭૬॥

કેવલં જ્ઞાનરૂપોऽહં કેવલં પરમોऽસ્મ્યહમ્ ॥ ૭૭॥

કેવલં શાન્તરૂપોऽહં કેવલં ચિન્મયોऽસ્મ્યહમ્ ॥ ૭૮॥

કેવલં નિત્યરૂપોऽહં કેવલં શાશ્વતોऽસ્મ્યહમ્ ॥ ૭૯॥

કેવલં સત્યરૂપોऽહમહં ત્યક્ત્વાહમસ્મ્યહમ્ ॥ ૮૦॥

કેવલં તુર્યરૂપોऽસ્મિ તુર્યાતીતોऽસ્મિ કેવલઃ ॥ ૮૧॥

કેવલાકારરૂપોऽસ્મિ શુદ્ધરૂપોऽસ્મ્યહં સદા ॥ ૮૨॥

નિર્વિકલ્પસ્વરૂપોऽસ્મિ નિરીહોऽસ્મિ નિરામયઃ ॥ ૮૩॥

અપરિચ્છિન્નરૂપોऽસ્મિ હ્યનન્તાનન્દરૂપવાન્ ॥ ૮૪॥

આત્મારામસ્વરૂપોऽસ્મિ અહમાત્મા સદાશિવઃ ॥ ૮૫॥

આદિમધ્યાન્તશૂન્યોऽસ્મિ હ્યાકાશસદૃશોऽસ્મ્યહમ્ ॥ ૮૬॥

નિત્યશુદ્ધચિદાનન્દઃ સત્તામાત્રોऽહમવ્યયઃ ॥ ૮૭॥

નિત્યબુદ્ધવિશુદ્ધૈકઃ સચ્ચિદાનન્દમસ્મ્યહમ્ ॥ ૮૮॥

ભૂમાનન્દસ્વરૂપોऽસ્મિ ભાષાહીનોऽસ્મ્યહં સદા ॥ ૮૯॥

સર્વાધિષ્ઠાનરૂપોઽસ્મિ સર્વદા ચિદ્ઘનોઽસ્મ્યહમ્ ॥ ૯૦ ॥

ચિત્તવૃત્તિવિહીનોઽહં ચિદાત્મૈકરસોઽસ્મ્યહમ્ ॥ ૯૧ ॥

અહં બ્રહ્મૈવ સર્વં સ્યાદહં ચૈતન્યમેવ હિ ॥ ૯૨ ॥

અહમેવાહમેવાસ્મિ ભૂમાકારસ્વરૂપવાન્ ॥ ૯૩ ॥

અહમેવ મહાનાત્મા હ્યહમેવ પરાત્પરઃ ॥ ૯૪ ॥

અહમન્યવદાભામિ હ્યહમેવ શરીરવત્ ॥ ૯૫ ॥

અહં શિષ્યવદાભામિ હ્યહં લોકત્રયાશ્રયઃ ॥ ૯૬ ॥

અહં કાલત્રયાતીતો હ્યહં વેદૈરુપાસિતઃ ॥ ૯૭ ॥

અહં શાસ્ત્રેણ નિર્ણીત અહં ચિત્તે વ્યવસ્થિતઃ ॥ ૯૮ ॥

આનન્દઘન એવાહમહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯૯ ॥

આત્મનાત્મનિ તૃપ્તોઽસ્મિ હ્યરૂપો હ્યહમવ્યયઃ ॥ ૧૦૦ ॥

આકાશાદપિ સૂક્ષ્મોઽહમાદ્યન્તાભાવવાનહમ્ ॥ ૧૦૧ ॥

સત્તામાત્રસ્વરૂપોઽહં શુદ્ધમોક્ષસ્વરૂપવાન્ ॥ ૧૦૨ ॥

સત્યાનન્દસ્વરૂપોઽહં જ્ઞાનાનન્દઘનોઽસ્મ્યહમ્ ॥ ૧૦૩ ॥

નામરૂપવિમુક્તોઽહમહમાનન્દવિગ્રહઃ ॥ ૧૦૪ ॥

આદિચૈતન્યમાત્રોઽહમખણ્ડૈકરસોઽસ્મ્યહમ્ ॥ ૧૦૫ ॥

સર્વત્ર પૂર્ણરૂપોઽહં પરામૃતરસોઽસ્મ્યહમ્ ॥ ૧૦૬ ॥

એકમેવાદ્વિતીયં સદ્બ્રહ્મૈવાહં ન સંશયઃ ॥ ૧૦૭ ॥

અહમેવ પરં બ્રહ્મ હ્યહમેવ ગુરોર્ગુરુઃ ॥ ૧૦૮ ॥

સર્વજ્ઞાનપ્રકાશોઽસ્મિ મુખ્યવિજ્ઞાનવિગ્રહઃ ॥ ૧૦૯ ॥

તુર્યાતુર્યપ્રકાશોઽસ્મિ તુર્યાતુર્યાદિવર્જિતઃ ॥ ૧૧૦ ॥

દૃશિસ્વરૂપં ગગનોપમં પરં સકૃદ્વિભાતં ત્વજમેકમક્ષરમ્ ॥ ૧૧૧ ॥

અલેપકં સર્વગતં યદવ્યયં તદેવ ચાહં સકલં વિમુક્ત ૐ ॥ ૧૧૨ ॥

અહં બ્રહ્માસ્મિ મન્ત્રોઽયં જન્મપાપં વિનાશયેત્ ॥ ૧૧૩ ॥

અહં બ્રહ્માસ્મિ મન્ત્રોઽયં ભેદબુદ્ધિં વિનાશયેત્ ॥ ૧૧૪॥

અહં બ્રહ્માસ્મિ મન્ત્રોઽયં કોટિદોષં વિનાશયેત્ ॥ ૧૧૫॥

અહં બ્રહ્માસ્મિ મન્ત્રોઽયં જ્ઞાનાનન્દં પ્રયચ્છતિ ॥ ૧૧૬॥

સર્વમન્ત્રાન્સમુત્સૃજ્ય ઇમં મન્ત્રં સમભ્યસેત્ ॥ ૧૧૭॥

સદ્યો મોક્ષમવાપ્નોતિ નાસ્તિ સન્દેહમણ્વપિ ॥ ૧૧૮॥

ઇતિ સ્વાનુભૂતિવાક્યાનિ અષ્ટાદશોત્તરશતમ્ ॥ ૧૧૮॥

નવમં પ્રકરણં સમાપ્તમ્ ।

---

૧૦ અથ સાર્ધાન્તિકસમાધિવાક્યાનિ । (૫૦)

જીવાત્મપરમાત્મૈક્યાવસ્થા ત્રિપુટિરહિતા પરમાનન્દસ્વરૂપા
શુદ્ધચૈતન્યાત્મિકા સમાધિઃ ॥ ૧॥

ધ્યાતૃધ્યાને વિહાય નિવાતસ્થિતદીપવદ્ધ્યેયૈકગોચરં ચિત્તં સમાધિઃ ॥ ૨॥

મનઃ પ્રચારશૂન્યં પરમાત્મનિ લીનં ભવતિ ॥ ૩॥

પ્રાપ્તે જ્ઞાનેન વિજ્ઞાને જ્ઞેયે પરમાત્મનિ હૃદિ સંસ્થિતે દેહે
લબ્ધશાન્તિપદં ગતે તદા પ્રભા મનોબુદ્ધિશૂન્યં ભવતિ ॥ ૪॥

પ્રાણાપાનયોરૈક્યં કૃત્વા ધૃતકુમ્ભકો નાસાગ્રદર્શનદૃઢભાવનયા
દ્વિકરાઙ્ગુલિભિઃ ષણ્મુખીકરણેન પ્રણવધ્વનિં નિશમ્ય મનસ્તત્ર
લીનં ભવતિ ॥ ૫॥

પયઃસ્રવાનન્તરં ધેનુસ્તનક્ષીરમિવ સર્વેન્દ્રિયવર્ગે પરિનષ્ટે મનોનાશં
ભવતિ ॥ ૬॥

યદા પઞ્ચાવતિષ્ઠન્તે જ્ઞાનાનિ મનસા સહ ॥ ૭॥

બુદ્ધિશ્ચ ન વિચેષ્ટતિ તામાહુઃ પરમાં ગતિમ્ ॥ ૮॥

સંશાન્તસર્વસઙ્કલ્પા યા શિલાવદવસ્થિતિઃ ॥ ૯॥

જાગ્રન્નિદ્રાવિનિર્મુક્તા સા સ્વરૂપસ્થિતિઃ પરા ॥ ૧૦॥

મારુતેમધ્યસઞ્ચારે મનઃસ્થૈર્યં પ્રજાયતે ॥ ૧૧॥

યો મનઃ સુસ્થિરીભાવઃ સૈવાવસ્થા મનોન્મની ॥ ૧૨॥

સરૂપોઽસૌ મનોનાશો જીવન્મુક્તસ્ય વિદ્યતે ॥ ૧૩॥

નિદ્રાઘરૂપનાશસ્તુ વર્તતે દેહમુક્તિકે ॥ ૧૪॥

ચિત્તે ચૈત્યદશાહીને યા સ્થિતિઃ ક્ષીણચેતસામ્ ॥ ૧૫॥

સોચ્યતે શાન્તકલના જાગ્રત્યેવ સુષુપ્તતા ॥ ૧૬॥

નૈતજ્જાગ્રન્ન ચ સ્વપ્નઃ સઙ્કુલ્પાનામભાવનાત્ ॥ ૧૭॥

સુષુપ્તભાવો નાપ્યેતદભાવાજ્જડતાસ્થિતેઃ ॥ ૧૮॥

સત્ત્વાવબોધ એવાસૌ વાસનાતૃણપાવકઃ ॥ ૧૯॥

પ્રોક્તઃ સમાધિશબ્દેન ન તુ તૂષ્ણીમવસ્થિતિઃ ॥ ૨૦॥

નિર્વિકારતયા વૃત્ત્યા બ્રહ્માકારતયા પુનઃ ॥ ૨૧॥

વૃત્તિવિસ્મરણં સમ્યક્સમાધિરભિધીયતે ॥ ૨૨॥

દૃશ્યાસમ્ભવબોધેન રાગદ્વેષાદિતાનવે ॥ ૨૩॥

રતિર્વલોદિતા યા સા સમાધિરભિધીયતે ॥ ૨૪॥

અહમેવ પરં બ્રહ્મ બ્રહ્માહમિતિ સંસ્થિતિઃ ॥ ૨૫॥

સમાધિઃ સ તુ વિજ્ઞેયઃ સર્વવૃત્તિનિરોધકઃ ॥ ૨૬॥

સમાધિઃ સંવિદુત્પત્તિઃ પરજીવૈકતાં પ્રતિ ॥ ૨૭॥

ધ્યાનસ્ય વિસ્મૃતિઃ સમ્યક્સમાધિરભિધીયતે ॥ ૨૮॥

સમાહિતા નિત્યતૃપ્તા યથાભૂતાર્થદર્શિની ॥ ૨૯॥

બ્રહ્મન્સમાધિશબ્દેન પરા પ્રજ્ઞોચ્યતે બુધૈઃ ॥ ૩૦॥

અક્ષુબ્ધા નિરહઙ્કારા દ્વન્દ્વેષ્વનનુપાતિની ॥ ૩૧॥

બ્રહ્મન્સમાધિ શબ્દેન મેરોઃ સ્થિરતરા સ્થિતિઃ ॥ ૩૨॥

નિશ્ચિત્તા વિગતાઽભીષ્ટા હેયોપાદેયવર્જિતા ॥ ૩૩॥

બ્રહ્મન્સમાધિ શબ્દેન પરિપૂર્ણમનોગતિઃ ॥ ૩૪॥

સલિલે સૈન્ધવં યદ્વત્સામ્યં ભજતિ યોગતઃ ॥ ૩૫॥

તથાત્મમનસોરૈક્યં સમાધિરભિધીયતે ॥ ૩૬॥

યત્સમત્વં તયોરત્ર જીવાત્મપરમાત્મનોઃ ॥ ૩૭ ॥

સમસ્તનષ્ટસઙ્કલ્પઃ સમાધિરભિધીયતે ॥ ૩૮ ॥

પ્રભાશૂન્યં મનઃશૂન્યં બુદ્ધિશૂન્યં નિરામયમ્ ॥ ૩૯ ॥

સર્વશૂન્યં નિરાભાસં સમાધિરભિધીયતે ॥ ૪૦ ॥

બ્રહ્માકારમનોવૃત્તિપ્રવાહોઽહઙ્કૃતિં વિના ॥ ૪૧ ॥

સમ્પ્રજ્ઞાતસમાધિઃ સ્યાદ્ધ્યાનાભ્યાસપ્રકર્ષતઃ ॥ ૪૨ ॥

પ્રશાન્તવૃત્તિકં ચિત્તં પરમાનન્દદીપકમ્ ॥ ૪૩ ॥

અસમ્પ્રજ્ઞાતનામાયં સમાધિર્યોગિનાં પ્રિયઃ ॥ ૪૪ ॥

સ્વાનુભૂતિરસાવેશાદ્દૃશ્યશબ્દાવુપેક્ષિતુઃ ॥ ૪૫ ॥

નિર્વિકલ્પસમાધિઃ સ્યાન્નિવાતસ્થિતદીપવત્ ॥ ૪૬ ॥

પ્રભાશૂન્યં મનઃશૂન્યં બુદ્ધિશૂન્યં ચિદાત્મકમ્ ॥ ૪૭ ॥

અન્તર્વ્યાવૃત્તિરૂપોઽસૌ સમાધિર્મુનિભાવિતઃ ॥ ૪૮ ॥

ઊર્ધ્વપૂર્ણમધઃપૂર્ણં મધ્યપૂર્ણં શિવાત્મકમ્ ॥ ૪૯ ॥

સાક્ષાદ્વિધિમુખો હ્યેષ સમાધિઃ પારમાર્થિકઃ ॥ ૫૦ ॥

ઇતિ સાર્ધાન્તિકસમાધિવાક્યાનિ પઞ્ચાશત્ ॥ ૫૦ ॥

દશમં પ્રકરણં સમાપ્તમ્ ।

---

૧૧ અથ સાર્ધાન્તિકાષ્ટવિધિસ્વરૂપવાક્યેષુ નાનાલિઙ્ગસ્વરૂપવાક્યાનિ ॥ (૩૨)

શ્રોત્રસ્ય શ્રોત્રં મનસો મનો યદ્વાચો હ વાચં સ ઉ પ્રાણસ્ય પ્રાણઃ ॥ ૧ ॥

યો વૈ ભૂમા તત્સુખમ્ ॥ ૨ ॥

યો વૈ ભૂમા તદમૃતમ્ ॥ ૩ ॥

નેતિ નેતિ નહ્યેતસ્માદિતિ નેત્યન્યત્પરમસ્ત્યથ નામધેયꣳ
સત્યસ્ય સત્યમિતિ પ્રાણા વૈ સત્યં તેષામેવ સત્યમ્ ॥ ૪ ॥

રાતેર્દાતુઃ પરાયણમ્ ॥ ૫ ॥

સ પર્યગાચ્છુક્રમકાયમવ્રણમસ્નાવિરꣳ શુદ્ધમપાપવિદ્ધમ્ ॥ ૬ ॥

પ્રણવો હ્યપરં બ્રહ્મ પ્રણવશ્ચ પરઃ સ્મૃતઃ ॥ ૭॥

ન નિરોધો ન ચોત્પત્તિર્ન બદ્ધો ન ચ સાધકઃ ॥ ૮॥

ન મુમુક્ષુર્ન વૈ મુક્ત ઇત્યેષા પરમાર્થતા ॥ ૯॥

અખણ્ડૈકરસં શાસ્ત્રમખણ્ડૈકરસા ત્રયી ॥ ૧૦॥

અખણ્ડૈકરસો દેહ અખણ્ડૈકરસં મનઃ ॥ ૧૧॥

અખણ્ડૈકરસં સૂત્રમખણ્ડૈકરસો વિરાટ્ ॥ ૧૨॥

અખણ્ડૈકરસાવિદ્યા હ્યખણ્ડૈકરસોઽવ્યયઃ ॥ ૧૩॥

અખણ્ડૈકરસં ગોપ્યમખણ્ડૈકરસઃ શશી ॥ ૧૪॥

અખણ્ડૈકરસં ક્ષેત્રમખણ્ડૈકરસા ક્ષમા ॥ ૧૫॥

અખણ્ડૈકરસાસ્તારા અખણ્ડૈકરસો રવિઃ ॥ ૧૬॥

અખણ્ડૈકરસો જ્ઞાતા અખણ્ડૈકરસા સ્થિતિઃ ॥ ૧૭॥

અખણ્ડૈકરસા માતા અખણ્ડૈકરસઃ પિતા ॥ ૧૮॥

અખણ્ડૈકરસો રાજા અખણ્ડૈકરસં પુરમ્ ॥ ૧૯॥

અખણ્ડૈકરસં તારમખણ્ડૈકરસો જપઃ ॥ ૨૦॥

સર્વવર્જિતચિન્માત્રં ત્વત્તા મત્તા ચ ચિન્મયમ્ ॥ ૨૧॥

આદિરન્તં ચ ચિન્માત્રં ગુરુશિષ્યાદિ ચિન્મયમ્ ॥ ૨૨॥

દૃગ્દૃશ્યં યદિ ચિન્માત્રમસ્તિ ચેચ્ચિન્મયં સદા ॥ ૨૩॥

સર્વાશ્ચર્યં ચ ચિન્માત્રં દેહશ્ચિન્માત્રમેવ હિ ॥ ૨૪॥

અહં ત્વં ચૈવ ચિન્માત્રં મૂર્તામૂર્તાદિ ચિન્મયમ્ ॥ ૨૫॥

પુણ્યં પાપં ચ ચિન્માત્રં જીવશ્ચિન્માત્રવિગ્રહઃ ॥ ૨૬॥

દેહત્રયવિહીનત્વાત્કાલત્રયવિવર્જનાત્ ॥ ૨૭॥

જીવત્રયગુણાભાવાત્તાપત્રયવિવર્જનાત્ ॥ ૨૮॥

લોકત્રયવિહીનત્વાત્સર્વમાત્મેતિ શાસનાત્ ॥ ૨૯॥

ચિત્તાભાવાચ્ચિન્તનીયં દેહાભાવાજ્જરા ન ચ ॥ ૩૦॥

પાદાભાવાદ્ગતિર્નાસ્તિ હસ્તાભાવાત્ક્રિયા ન ચ ॥ ૩૧॥

મૃત્યુર્નાસ્તિ જનાભાવાદ્બુદ્ધ્યભાવાત્સુખાદિકમ્ ॥ ૩૨॥

ઇતિ સાર્ધાન્તિકનાનાલિઙ્ગસ્વરૂપવાક્યાનિ દ્વાત્રિંશત્ ॥ ૩૨॥

એકાદશં પ્રકરણં સમાપ્તમ્ ।

૧૨ અથ સાર્ધાન્તિકપુંલિઙ્ગસ્વરૂપવાક્યાનિ । (૩૦)

સ એષોઽકલોઽમૃતઃ ॥ ૧॥

નાન્તઃપ્રજ્ઞં ન બહિઃપ્રજ્ઞં નોભયતઃપ્રજ્ઞં ન પ્રજ્ઞાનઘનં ન પ્રજ્ઞં
નાપ્રજ્ઞમદૃશ્યમવ્યવહાર્યમગ્રાહ્યમલક્ષણમચિન્ત્યમવ્યપદેશ્ય-
મૈકાત્મપ્રત્યયસારં પ્રપઞ્ચોપશમં શાન્તં શિવમદ્વૈતં
ચતુર્થં મન્યન્તે સ આત્મા સ વિજ્ઞેયઃ ॥ ૨॥

અમાત્રશ્ચતુર્થોઽવ્યવહાર્યઃ પ્રપઞ્ચોપશમઃ શિવોઽદ્વૈતઃ ॥ ૩॥

યત્ર નાન્યત્પશ્યતિ નાન્યચ્છૃણોતિ નાન્યદ્વિજાનાતિ સ ભૂમા ॥ ૪॥

સ એષ નેતિનેત્યાત્માઽગૃહ્યો ન હિ ગૃહ્યતેઽશીર્યો ન હિ શીર્યતેઽસઙ્ગો
ન હિ સજ્યતેઽસિતો ન વ્યથતે ન રિષ્યતિ ॥ ૫॥

રસઘન એવૈવં વાઽરેયમાત્માનન્તરોઽબાહ્યઃ કૃત્સ્નઃ પ્રજ્ઞાનઘન એવ ॥ ૬॥

તસ્માન્મનો વિલીને મનસિ ગતે સઙ્કલ્પવિકલ્પે દગ્ધે પુણ્યપાપે સદાશિવઃ
ૐ શક્ત્યાત્મકઃ સર્વત્રાવસ્થિતિઃ સ્વયંજ્યોતિઃ શુદ્ધો નિત્યો નિરઞ્જનઃ
શાન્તતમઃ પ્રકાશયતિ ॥ ૭॥

એષ શુદ્ધઃ પૂતઃ શૂન્યઃ શાન્તોઽપ્રાણોઽનીશાત્માનન્તોઽક્ષયઃ સ્થિરઃ
શાશ્વતોઽજઃ સ્વતન્ત્રઃ સ્વે મહિમ્નિ તિષ્ઠતિ ॥ ૮॥

ચક્ષુષો દ્રષ્ટા શ્રોત્રસ્ય દ્રષ્ટા મનસો દ્રષ્ટા વાચો દ્રષ્ટા બુદ્ધેર્દ્રષ્ટા
પ્રાણસ્ય દ્રષ્ટા તમસો દ્રષ્ટા સર્વસ્ય દ્રષ્ટા તતઃ સર્વસ્માદન્યો
વિલક્ષણઃ સદ્ઘનોઽયં ચિદ્ઘન આનન્દઘન એવૈકરસોઽવ્યવહાર્યઃ ॥ ૯॥

સન્માત્રો નિત્યઃ શુદ્ધો બુદ્ધઃ સત્યો મુક્તો નિરઞ્જનો વિભુરદ્વયાનન્દઃ
પરઃ પ્રત્યગેકરસઃ ॥ ૧૦॥

અદૃષ્ટોઽવ્યવહાર્યોઽપ્યલ્પો નાલ્પઃ સાક્ષ્યવિશેષઃ સર્વજ્ઞોઽનન્તોઽભિન્નોઽદ્વયો

વિદિતાવિદિતાત્પરઃ ॥ ૧૧॥

અદ્વૈતપરમાનન્દો વિભુર્નિત્યો નિષ્કલઙ્કો નિર્વિકલ્પો નિરઞ્જનો નિરાખ્યાતઃ
શુદ્ધો દેવ એકો નારાયણો ન દ્વિતીયોઽસ્તિ કશ્ચિત્ ॥ ૧૨॥

અચક્ષુર્વિશ્વતશ્ચક્ષુરકર્ણો વિશ્વતઃકર્ણ અપાદો વિશ્વતઃપાદ
અપાણિર્વિશ્વતઃપાણિરહમશિરા વિશ્વતઃશિરા વિદ્યામાત્રૈકસંશ્રયો વિદ્યારૂપઃ ॥ ૧૩॥

દિવ્યો હ્યમૂર્તઃ પુરુષઃ સબાહ્યાભ્યન્તરો હ્યજઃ ॥ ૧૪॥

અપ્રાણો હ્યમનાઃ શુભ્રો હ્યક્ષરાત્પરતઃ પરઃ ॥ ૧૫॥

અદ્વૈતઃ સર્વભાવાનાં દેવસ્તુર્યો વિભુઃ સ્મૃતઃ ॥ ૧૬॥

અપૂર્વોઽનન્તરોઽબાહ્યો ન પરઃ પ્રણવોઽવ્યયઃ ॥ ૧૭॥

અમાત્રોઽનન્તમાત્રશ્ચ દ્વૈતસ્યોપશમઃ શિવઃ ॥ ૧૮॥

કર્માધ્યક્ષઃ સર્વભૂતાધિવાસઃ સાક્ષી ચેતા કેવલો નિર્ગુણશ્ચ ॥ ૧૯॥

સર્વસઙ્કલ્પરહિતઃ સર્વનાદમયઃ શિવઃ ॥ ૨૦॥

સર્વવર્જિતચિન્માત્રઃ સર્વાનન્દમયઃ પરઃ ॥ ૨૧॥

સર્વાનુભવનિર્મુક્તઃ સર્વધ્યાનવિવર્જિતઃ ॥ ૨૨॥

આત્માઽનાત્મવિવેકાદિભેદાભેદવિવર્જિતઃ ॥ ૨૩॥

મહાવાક્યાર્થતો દૂરો બ્રહ્માસ્મીત્યતિદૂરતઃ ॥ ૨૪॥

તચ્છબ્દવર્જ્યસ્ત્વંશબ્દહીનો વાક્યાર્થવર્જિતઃ ॥ ૨૫॥

ક્ષરાક્ષરવિહીનો યો નાદાન્તર્જ્યોતિરેવ સઃ ॥ ૨૬॥

અખણ્ડૈકરસો વાહમાનન્દોઽસ્મીતિવર્જિતઃ ॥ ૨૭॥

દૃશ્યદર્શનનિર્મુક્તઃ કેવલામલરૂપવાન્ ॥ ૨૮॥

નિત્યોદિતો નિરાભાસો દ્રષ્ટા સાક્ષી ચિદાત્મકઃ ॥ ૨૯॥

સ એવ વિદિતાદન્યસ્તથૈવાવિદિતાદપિ ॥ ૩૦॥

ઇતિ સાર્ધાન્તિકપુંલિઙ્ગસ્વરૂપવાક્યાનિ ત્રિંશત્ ॥ ૩૦॥

દ્વાદશં પ્રકરણં સમાપ્તમ્ ।

૧૩ અથ સાર્ધાન્તિકસ્ત્રીલિઙ્ગસ્વરૂપવાક્યાનિ । (૧૨)
અલૌકિકપરમાનન્દલક્ષણાખણ્ડામિતતેજોરાશિઃ ॥ ૧॥

ભાવાભાવકલાવિનિર્મુક્તા ચિદ્વિદ્યાઽદ્વિતીયબ્રહ્મસંવિત્તિઃ
સચ્ચિદાનન્દલહરી મહાત્રિપુરસુન્દરી બહિરન્તરપ્રવિશ્ય
સ્વયમેકૈવ વિભાતિ ॥ ૨॥

સર્વસઙ્કલ્પરહિતા સર્વસંજ્ઞાવિવર્જિતા ॥ ૩॥

સૈષા ચિદવિનાશાત્મા સ્વાત્મેત્યાદિકૃતા ભિધા ॥ ૪॥

આકાશશતભાગાચ્છા જ્ઞેષુ નિષ્કલરૂપિણી ॥ ૫॥

નાસ્તમેતિ ન ચોદેતિ નોત્તિષ્ઠતિ ન તિષ્ઠતિ ॥ ૬॥

ન ચ યાતિ ન ચાયાતિ ન ચ નેહ ચેહ ચિત્ ॥ ૭॥

સૈષા ચિદમલાકારા નિર્વિકલ્પા નિરાસ્પદા ॥ ૮॥

મહાચિદેકૈવેહાસ્તિ મહાસત્તેતિ ચોચ્યતે ॥ ૯॥

નિષ્કલઙ્કા સમા શુદ્ધા નિરહઙ્કારરૂપિણી ॥ ૧૦॥

સકૃદ્વિભાતા વિમલા નિત્યોદયવતી સમા ॥ ૧૧॥

સા બ્રહ્મપરમાત્મેતિ નામભિઃ પરિગીયતે ॥ ૧૨॥

ઇતિ સ્ત્રીલિઙ્ગસ્વરૂપવાક્યાનિ દ્વાદશ ॥ ૧૨॥

ત્રયોદશં પ્રકરણં સમાપ્તમ્ ।

---

૧૪ અથ નપુંસકલિઙ્ગસ્વરૂપવાક્યાનિ ॥ (૩૯)
અન્યદેવ તદ્વિદિતાદથો અવિદિતાદધિ ॥ ૧॥

યત્તદદ્રેશ્યમગ્રાહ્યમગોત્રમવર્ણમચક્ષુઃશ્રોત્રં તદપાણિપાદમ્ ॥ ૨॥

સદેવ સોમ્યેદમગ્ર આસીદેકમેવાદ્વિતીયમ્ ॥ ૩॥

અસ્થૂલમનણ્વહ્રસ્વમદીર્ઘમલોહિતમસ્નેહમચ્છાયમતમોઽવાય્વનાકાશ-
મસઙ્ગમરસમગન્ધમચક્ષુષ્કમશ્રોત્રમવાગમનોઽતેજસ્કમપ્રાણ-
મમુખમમાત્રમનન્તરમબાહ્યમ્ ॥ ૪॥

નિત્યં શુદ્ધં મુક્તં સત્યં સૂક્ષ્મં પરિપૂર્ણમદ્વયં સદાનન્દચિન્માત્રં

પુરતઃ સુવિભાતમદ્વૈતમચિન્ત્યમલિઙ્ગં સ્વપ્રકાશમાનન્દઘનમ્ ॥ ૫॥

એતદ્ધ્યશબ્દમસ્પર્શમરૂપમરસમગન્ધમવક્તવ્યમદાતવ્યમગન્તવ્ય-
મવિસર્જયિતવ્યમનાનન્દયિતવ્યમમન્તવ્યમબોદ્ધવ્યમનહઙ્કર્તયિતવ્ય-
મચેતયિતવ્યમપ્રાણમિતવ્યમપાનયિતવ્યમવ્યાનયિતવ્યમનુદાનયિતવ્ય-
મસમાનયિતવ્યમનિન્દ્રિયમવિષયમકરણમલક્ષણમસઙ્ગમગુણ-
મવિક્રિયમવ્યપદેશ્યમસત્ત્વમરજસ્કમતમસ્કમમાયમભયમપ્યૌપનિષદમેવ
સુવિભાતં સકૃદ્વિભાતં પુરતોઽસ્માત્સુવિભાતમદ્વયમ્ ॥ ૬॥

અનિર્વચનીયં જ્યોતિઃ સર્વવ્યાપકં નિરતિશયાનન્દલક્ષણં પરમાકાશમ્ ॥ ૭॥

તદ્બ્રહ્મ તાપત્રયાતીતં ષટ્કોશવિનિર્મુક્તં ષડૂર્મિવર્જિતં પઞ્ચકોશાતીતં
ષડ્ભાવવિકારશૂન્યમેવમાદિસર્વં વિલક્ષણમ્ ॥ ૮॥

નિરુપપ્લવં જ્યોતિરાભ્યન્તરં સર્વમાયાતીતમપ્રત્યગેકરસમદ્વિતીયમ્ ॥ ૯॥

તજ્જ્યોતિરેકમદ્વિતીયં સર્વકલ્પનાતીતં ધ્રુવમક્ષરમેકં સદા ચકાસ્તિ
સચ્ચિદાનન્દમ્ ॥ ૧૦॥

યત્તત્સત્યં વિજ્ઞાનમાનન્દં નિષ્ક્રિયં નિરઞ્જનં સર્વગતં સુસૂક્ષ્મં
સર્વતોમુખનિર્દેશ્યમમૃતં નિષ્કલમ્ ॥ ૧૧॥

એકમદ્વૈતં નિષ્કલં નિષ્ક્રિયં શાન્તં નિરતિશયમનામયમદ્વૈતં ચતુર્થં
બ્રહ્મવિષ્ણુરુદ્રાતીતમેકમાશાસ્યમ્ ॥ ૧૨॥

અદ્વયમનાદ્યન્તમશેષવેદવેદાન્તવેદ્યમનિર્દેશ્યમનિરુક્તમપ્રચ્યવમાશાસ્યમદ્વૈતં
ચતુર્થં સર્વાધારમનાધારમનિરીક્ષ્યમ્ ॥ ૧૩॥

અશબ્દમસ્પર્શમરૂપમવ્યયં તથાઽરસન્નિત્યમગન્ધવચ્ચ યત્ ॥ ૧૪॥

પરં વિજ્ઞાનાદ્યદ્વરિષ્ઠં પ્રજાનાં યદર્ચિમદ્યદણુભ્યોઽણુ ચ ॥ ૧૫॥

બૃહચ્ચ તદ્દિવ્યમચિન્ત્યરૂપં સૂક્ષ્માચ્ચ તત્સૂક્ષ્મતરં વિભાતિ ॥ ૧૬॥

એતજ્જ્ઞેયં નિત્યમેવાત્મસંસ્થં નાતઃ પરં વેદિતવ્યં હિ કિઞ્ચિત્ ॥ ૧૭॥

અઘોષમવ્યઞ્જનમસ્વરં ચ યત્તાલુકણ્ઠોષ્ઠમનાસિકં ચ યત્ ॥ ૧૮॥

અરેફજાતમુભયોષ્મવર્જિતં યદક્ષરં ન ક્ષરતે કથઞ્ચિત્ ॥ ૧૯॥

અગોચરં મનોવાચામવધૂતાદિસમ્પ્લવમ્ ॥ ૨૦॥

સત્તામાત્રપ્રકાશૈકપ્રકાશં ભાવનાતિગમ્ ॥ ૨૧॥

અહેયમનુપાદેયમસામાન્યવિશેષણમ્ ॥ ૨૨ ॥

ધ્રુવં સ્તિમિતગમ્ભીરં ન તેજો ન તમસ્તતમ્ ॥ ૨૩ ॥

નિષ્કલં નિર્મલં શાન્તં સર્વાતીતં નિરામયમ્ ॥ ૨૪ ॥

ન શૂન્યં નાપિ ચાકારિ ન દૃશ્યં નાપિ દર્શનમ્ ॥ ૨૫ ॥

ચિન્માત્રં ચૈત્યરહિતમનન્તમજરં શિવમ્ ॥ ૨૬ ॥

ચૈત્યાનુપાતરહિતં સામાન્યેન ચ સર્વગમ્ ॥ ૨૭ ॥

અનામયમનાભાસમનામકમકારણમ્ ॥ ૨૮ ॥

મનોવચોભ્યામગ્રાહ્યં પૂર્ણાત્પૂર્ણં સુખાત્સુખમ્ ॥ ૨૯ ॥

દ્રષ્ટૃદર્શનદૃશ્યાદિવર્જિતં તદિદં પદમ્ ॥ ૩૦ ॥

શુદ્ધં સૂક્ષ્મં નિરાકારં નિર્વિકારં નિરઞ્જનમ્ ॥ ૩૧ ॥

અપ્રમાણમનિર્દેશ્યમપ્રમેયમતીન્દ્રિયમ્ ॥ ૩૨ ॥

નિર્લેપકં નિરાપાયં કૂટસ્થમચલં ધ્રુવમ્ ॥ ૩૩ ॥

સદ્ઘનં ચિદ્ઘનં નિત્યમાનન્દઘનમવ્યયમ્ ॥ ૩૪ ॥

પ્રત્યગેકરસં પૂર્ણમનન્તં વિશ્વતોમુખમ્ ॥ ૩૫ ॥

અહેયમનુપાદેયમનાદેયમનાશ્રયમ્ ॥ ૩૬ ॥

શુદ્ધં બુદ્ધં સદા મુક્તમનામકમરૂપકમ્ ॥ ૩૭ ॥

સઙ્કલ્પસઙ્ક્ષયવશાદ્ગલિતે તુ ચિત્તે સંસારમોહમિહિકા ગલિતા ભવન્તિ ॥ ૩૮ ॥

સ્વચ્છં વિભાતિ શરદીવ ખમાગતાયાં ચિન્માત્રમેકમજમાદ્યમનન્તમન્તઃ ॥ ૩૯ ॥

ઇતિ સાર્ધાન્તિકનપુંસકલિઙ્ગસ્વરૂપવાક્યાન્યેકોનચત્વારિંશત્ ॥ ૩૯ ॥

ચતુર્દશં પ્રકરણં સમાપ્તમ્ ।

---

૧૫ અથ સાર્ધાન્તિકાત્મસ્વરૂપમહાવાક્યાનિ । (૪૦)

આકાશો હ વૈ નામ નામરૂપયોર્નિર્વહિતા તે યદન્તરા તદ્બ્રહ્મ તદમૃતં સ આત્મા ॥ ૧ ॥

ઇદં સર્વં યદયમાત્મા ॥ ૨ ॥

ચિદેકરસો હ્યયમાત્મા ॥ ૩॥

અતો હ્યયમાત્મા ॥ ૪॥

અનુજ્ઞાતા હ્યયમાત્મા ॥ ૫॥

અનુજ્ઞૈકરસો હ્યયમાત્મા ॥ ૬॥

અવિકલ્પો હ્યયમાત્મા ॥ ૭॥

દેહાદેઃ પરતરત્વાદ્બ્રહ્મૈવ પરમાત્મા ॥ ૮॥

અખણ્ડૈકરસો હ્યયમાત્મા ॥ ૯॥

નિર્ગુણઃ સાક્ષીભૂતો નિષ્ક્રિયો નિરવયવાત્મા ॥ ૧૦॥

વિરજઃ પર આકાશાદજ આત્મા મહાન્ ધ્રુવઃ ॥ ૧૧॥

એકો દેવઃ સર્વભૂતેષુ ગૂઢઃ સર્વવ્યાપી સર્વભૂતાન્તરાત્મા ॥ ૧૨॥

નિઃશબ્દં પરમં બ્રહ્મ પરમાત્મા સમીર્યતે ॥ ૧૩॥

સકલે નિષ્કલે ભાવે સર્વત્રાત્માવ્યવસ્થિતઃ ॥ ૧૪॥

સર્વદા સર્વકૃત્સર્વઃ પરમાત્મેત્યુદાહૃતઃ ॥ ૧૫॥

અનાદ્યન્તાવભાસાત્મા પરમાત્મેહ વિદ્યતે ॥ ૧૬॥

નિત્યઃ સર્વગતો હ્યાત્મા કૂટસ્થો દોષવર્જિતઃ ॥ ૧૭॥

તત્પરઃ પરમાત્મા ચ શ્રીરામઃ પુરુષોત્તમઃ ॥ ૧૮॥

સર્વકારણકાર્યાત્મા કાર્યકારણવર્જિતઃ ॥ ૧૯॥

સર્વાતીતસ્વભાવાત્મા નાદાન્તર્જ્યોતિરેવ સઃ ॥ ૨૦॥

નિર્વિકલ્પસ્વરૂપાત્મા સવિકલ્પવિવર્જિતઃ ॥ ૨૧॥

સદા સમાધિશૂન્યાત્મા આદિમધ્યાન્તવર્જિતઃ ॥ ૨૨॥

પ્રજ્ઞાનવાક્યહીનાત્મા અહં બ્રહ્માસ્મિવર્જિતઃ ॥ ૨૩॥

તત્ત્વમસ્યાદિહીનાત્મા અયમાત્મેત્યભાવકઃ ॥ ૨૪॥

ઓઙ્કારવાચ્યહીનાત્મા સર્વવાચ્યવિવર્જિતઃ ॥ ૨૫॥

સર્વત્ર પૂર્ણરૂપાત્મા સર્વત્રાત્માવશેષકઃ ॥ ૨૬॥

શુદ્ધચૈતન્યરૂપાત્મા સર્વસિદ્ધિવિવર્જિતઃ ॥ ૨૭॥

આનન્દાત્મા પ્રિયો હ્યાત્મા મોક્ષાત્મા બન્ધવર્જિતઃ ॥ ૨૮॥

શૂન્યાત્મા સૂક્ષ્મરૂપાત્મા વિશ્વાત્મા વિશ્વહીનકઃ ॥ ૨૯॥

સત્તામાત્રસ્વરૂપાત્મા નાન્યત્કિઞ્ચિજ્જગદ્ભયમ્ ॥ ૩૦॥

અપરિચ્છિન્નરૂપાત્મા અણુસ્થૂલાદિવર્જિતઃ ॥ ૩૧॥

નામરૂપવિહીનાત્મા પરસંવિત્સુખાત્મકઃ ॥ ૩૨॥

સાક્ષ્યસાક્ષિત્વહીનાત્મા કિઞ્ચિત્કિઞ્ચિન્ન કિઞ્ચન ॥ ૩૩॥

મુક્તામુક્તસ્વરૂપાત્મા મુક્તામુક્તવિવર્જિતઃ ॥ ૩૪॥

દ્વૈતાદ્વૈતસ્વરૂપાત્મા દ્વૈતાદ્વૈતાદિવર્જિતઃ ॥ ૩૫॥

નિષ્કલાત્મા નિર્મલાત્મા બુદ્ધ્યાત્મા પુરુષાત્મકઃ ॥ ૩૬॥

આત્મેતિશબ્દહીનો ય આત્મશબ્દાર્થવર્જિતઃ ॥ ૩૭॥

સચ્ચિદાનન્દહીનો ય એષૈવાત્મા સનાતનઃ ॥ ૩૮॥

યસ્ય કિઞ્ચિદ્બહિર્નાસ્તિ કિઞ્ચિદન્તઃ કિયન્ન ચ ॥ ૩૯॥

યસ્ય લિઙ્ગં પ્રપઞ્ચં વા બ્રહ્મૈવાત્મા ન સંશયઃ ॥ ૪૦॥

ઇતિ સાર્ધાન્તિકાત્મસ્વરૂપવાક્યાનિ ચત્વારિંશત્ ॥ ૪૦॥

પઞ્ચદશં પ્રકરણં સમાપ્તમ્ ।

---

૧૬ અથ સાર્ધાન્તિકસર્વસ્વરૂપવાક્યાનિ ॥ (૪૦)

ૐકાર એવેદં સર્વમ્ ॥ ૧॥

સ એવાધસ્તાત્સ ઉપરિષ્ટાત્સ પશ્ચાત્સ પુરસ્તાત્સ
દક્ષિણતઃ સ ઉત્તરતઃ સ એવેદં સર્વમ્ ॥ ૨॥

અહમેવાધસ્તાદહમુપરિષ્ટાદહં પશ્ચાદહં
પુરસ્તાદહં દક્ષિણતો। આહમુત્તરતો। આહમેવેદં સર્વમ્ ॥ ૩॥

આત્મૈવાધસ્તાદાત્મોપરિષ્ટાદાત્મા પશ્ચાદાત્મા
પુરસ્તાદાત્મા દક્ષિણત આત્મોત્તરત આત્મૈવેદં સર્વમ્ ॥ ૪॥

આત્મૈવેદમમૃતમિદં બ્રહ્મેદં સર્વમ્ ॥ ૫॥

એતદ્બ્રહ્મૈતત્સર્વમ્ ॥ ૬॥

નારાયણ એવેદં સર્વમ્ ॥ ૭॥

સચ્ચિદાનન્દરૂપમિદં સર્વમ્ ॥ ૮॥

સત્તામાત્રં હીદં સર્વમ્ ॥ ૯॥

મત્સ્વરૂપમેવેદં સર્વમ્ ॥ ૧૦॥

સ એવ સર્વં યદ્ભૂતં યચ્ચ ભવ્યં સનાતનમ્ ॥ ૧૧॥

સ્વયં બ્રહ્મા સ્વયં વિષ્ણુઃ સ્વયમિન્દ્રઃ સ્વયં શિવઃ ॥ ૧૨॥

સ્વયં વિશ્વમિદં સર્વં સ્વસ્માદન્યન્ન કિઞ્ચન ॥ ૧૩॥

મરુભૂમૌ જલં સર્વં મરુભૂમાત્રમેવ તત્ ॥ ૧૪॥

જગત્ત્રયમિદં સર્વં ચિન્માત્રં સ્વવિચારતઃ ॥ ૧૫॥

ભવવર્જિતચિન્માત્રં સર્વં ચિન્માત્રમેવ હિ ॥ ૧૬॥

યત્કિઞ્ચિદ્યન્ન કિઞ્ચિચ્ચ સર્વં ચિન્માત્રમેવ હિ ॥ ૧૭॥

અખણ્ડૈકરસં સર્વં યદ્યચ્ચિન્માત્રમેવ હિ ॥ ૧૮॥

ભૂતં ભવ્યં ભવિષ્યચ્ચ સર્વં ચિન્માત્રમેવ હિ ॥ ૧૯॥

જ્ઞાતા ચિન્માત્રરૂપશ્ચ સર્વં ચિન્માત્રમેવ હિ ॥ ૨૦॥

યચ્ચ યાવચ્ચ દૂરસ્થં સર્વં ચિન્માત્રમેવ હિ ॥ ૨૧॥

ચિન્માત્રાન્નાસ્તિ લક્ષ્યં ચ સર્વં ચિન્માત્રમેવ હિ ॥ ૨૨॥

આત્મનોઽન્યા ગતિર્નાસ્તિ સર્વમાત્મમયં જગત્ ॥ ૨૩॥

આત્મનોઽન્યત્તુષં નાસ્તિ સર્વમાત્મમયં જગત્ ॥ ૨૪॥

સર્વમાત્મૈવ શુદ્ધાત્મા સર્વં ચિન્માત્રમદ્વયમ્ ॥ ૨૫॥

સર્વં ચ ખલ્વિદં બ્રહ્મ નિત્યચિદ્ઘનમક્ષતમ્ ॥ ૨૬॥

સમસ્તં ખલ્વિદં બ્રહ્મ સર્વમાત્મેદમાતતમ્ ॥ ૨૭॥

ન ત્વં નાહં ન ચાન્યં વા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૨૮॥

ન તદસ્તિ ન યત્રાહં ન તદસ્તિ ન તન્મયમ્ ॥ ૨૯॥

કિમન્યદભિવાઞ્છામિ સર્વં સચ્ચિન્મયં તતમ્ ॥ ૩૦॥

ભ્રાન્તિરભ્રાન્તિર્નાસ્ત્યેવ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૩૧॥

ન દેહો ન ચ કર્માણિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૩૨॥

લક્ષણાત્રયવિજ્ઞાનં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૩૩॥

જગન્નામ્નાચિદાભાતિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૩૪॥

બ્રહ્મમાત્રમિદં સર્વં બ્રહ્મ માત્રમસન્ન હિ ॥ ૩૫॥

બ્રહ્મમાત્રં વ્રતં સર્વં બ્રહ્મમાત્રં રસં સુખમ્ ॥ ૩૬॥

બ્રહ્મમાત્રં શ્રુતં સર્વં સ્વયં બ્રહ્મૈવ કેવલમ્ ॥ ૩૭॥

બ્રહ્મૈવ સર્વં ચિન્માત્રં બ્રહ્મમાત્રં જગત્ત્રયમ્ ॥ ૩૮॥

સર્વં પ્રશાન્તમજમેકમનાદિમધ્યમાભાસ્વરં સ્વદનમાત્રમચૈત્યમચિહ્નમ્ ॥ ૩૯॥

સર્વં પ્રશાન્તમિતિ શબ્દમયી ચ દૃષ્ટિર્બોધાર્ધમેવ હિ મુધૈવ તદોમિતીદમ્ ॥ ૪૦॥

ઇતિ સાર્ધાન્તિકસર્વસ્વરૂપવાક્યાનિ ચત્વારિંશત્ ॥ ૪૦॥

ષોડશં પ્રકરણં સમાપ્તમ્ ।

---

૧૭ અથ સાર્ધાન્તિકબ્રહ્મસ્વરૂપવાક્યાનિ । (૯૪)

સર્વં હ્યેતદ્ બ્રહ્મ ॥ ૧॥

અયમાત્મા બ્રહ્મ ॥ ૨॥

સત્યં જ્ઞાનમનન્તં બ્રહ્મ ॥ ૩॥

પ્રજ્ઞા પ્રતિષ્ઠા પ્રજ્ઞાનં બ્રહ્મ ॥ ૪॥

તદેતદ્બ્રહ્માઽપૂર્વમનપરમનન્તરમબાહ્યમયમાત્મા બ્રહ્મ સર્વાનુભૂઃ ॥ ૫॥

વિજ્ઞાનમાનન્દં બ્રહ્મ ॥ ૬॥

અજરોઽમરોઽમૃતોઽભયો બ્રહ્માભયં વૈ બ્રહ્મ ॥ ૭॥

સર્વભૂતસ્થમેકં નારાયણં કારણંપુરુષમકારણં પરં બ્રહ્મોમ્ ॥ ૮॥

સ્વયં પ્રકાશઃ સ્વયં બ્રહ્મ ॥ ૯॥

તદેતદદ્વયં સ્વયંપ્રકાશમહાનન્દમાત્મૈવૈતદભય-
મમૃતમેતદ્બ્રહ્મ ॥ ૧૦॥

સદેવ પુરસ્તાત્સિદ્ધં બ્રહ્મ ॥ ૧૧॥

આકાશવત્સૂક્ષ્મં કેવલસત્તામાત્રસ્વભાવં પરં બ્રહ્મ ॥ ૧૨॥

અદ્વિતીયમખિલોપાધિવિનિર્મુક્તં તત્સકલશક્ત્યુપબૃંહિતમનાદ્યનન્તં
નિત્યં શિવં શાન્તં નિર્ગુણમિત્યાદિવાચ્યમનિર્વાચ્યં ચૈતન્યં બ્રહ્મ ॥ ૧૩॥

એકમેવાદ્વિતીયં બ્રહ્મ ॥ ૧૪॥

સર્વદાનવચ્છિન્નં પરં બ્રહ્મ ॥ ૧૫॥

સચ્ચિદાનન્દતેજઃરૂપં તારકં બ્રહ્મ ॥ ૧૬॥

તન્નિત્યમુક્તમવિક્રિયં સત્યજ્ઞાનાનન્તાનન્દપરિપૂર્ણં સનાતનમેકમેવાદ્વિતીયં બ્રહ્મ ॥ ૧૭॥

ચિત્સ્વરૂપં નિરઞ્જનં પરં બ્રહ્મ ॥ ૧૮॥

તત્ત્વંપદલક્ષ્યં પ્રત્યગભિન્નં બ્રહ્મ ॥ ૧૯॥

અખણ્ડાર્થં પરં બ્રહ્મ ॥ ૨૦॥

સર્વકાલાબાધિતં બ્રહ્મ ॥ ૨૧॥

સગુણનિર્ગુણસ્વરૂપં બ્રહ્મ ॥ ૨૨॥

આદિમધ્યાન્તશૂન્યં બ્રહ્મ ॥ ૨૩॥

માયાતીતગુણાતીતં બ્રહ્મ ॥ ૨૪॥

અનન્તમપ્રમેયાખણ્ડપરિપૂર્ણં બ્રહ્મ ॥ ૨૫॥

અદ્વિતીયપરમાનન્દનિત્યશુદ્ધબુદ્ધમુક્તસત્યસ્વરૂપવ્યાપકાભિન્નાપરિચ્છિન્નં બ્રહ્મ ॥ ૨૬॥

સચ્ચિદાનન્દસ્વપ્રકાશં બ્રહ્મ ॥ ૨૭॥

મનોવાચામગોચરં બ્રહ્મ ॥ ૨૮॥

દેશતઃ કાલતો વસ્તુતઃ પરિચ્છેદરહિતં બ્રહ્મ ॥ ૨૯॥

અખિલપ્રમાણાગોચરં બ્રહ્મ ॥ ૩૦॥

તુરીયં નિરાકારમેકં બ્રહ્મ ॥ ૩૧॥

અદ્વૈતમનિર્વાચ્યં બ્રહ્મ ॥ ૩૨॥

શિવં પ્રશાન્તમમૃતં ચ પરં બ્રહ્મ ॥ ૩૩॥

યદેકમક્ષરં નિષ્ક્રિયં શિવં સન્માત્રં પરં બ્રહ્મ ॥ ૩૪॥

અસાવાદિત્યો બ્રહ્મ ॥ ૩૫॥

ૐમિત્યેતદક્ષરં પરં બ્રહ્મ ॥ ૩૬॥

બ્રહ્મૈવેદમમૃતં પુરસ્તાદ્બ્રહ્મ પશ્ચાદ્બ્રહ્મ દક્ષિણતશ્ચોત્તરેણ ॥ ૩૭॥

અધશ્ચોર્ધ્વં પ્રસૃતં બ્રહ્મૈવેદં વિશ્વમિદં વરિષ્ઠમ્ ॥ ૩૮॥

તદેવ નિષ્કલં બ્રહ્મ નિર્વિકલ્પં નિરઞ્જનમ્ ॥ ૩૯॥

ચૈતન્યમેકં બ્રહ્માતઃ પ્રજ્ઞાનં બ્રહ્મ મય્યપિ ॥ ૪૦॥

બ્રહ્મશબ્દેન તદ્બ્રહ્મ સ્વપ્રકાશાત્મરૂપકમ્ ॥ ૪૧॥

એતદ્ભાવવિનિર્મુક્તં તદ્બ્રહ્મ બ્રહ્મ તત્પરમ્ ॥ ૪૨॥

ચિન્માત્રાત્પરમં બ્રહ્મ ચિન્માત્રાન્નાસ્તિ કોઽપિ હિ ॥ ૪૩॥

અખણ્ડૈકરસં બ્રહ્મ ચિન્માત્રાન્ન હિ વિદ્યતે ॥ ૪૪॥

સદોદિતં પરં બ્રહ્મ જ્યોતિષામુદયો યતઃ ॥ ૪૫॥

યસ્મિન્પ્રલીયતે શબ્દસ્તત્પરં બ્રહ્મ ગીયતે ॥ ૪૬॥

સર્વશક્તિ પરં બ્રહ્મ નિત્યમાપૂર્ણમદ્વયમ્ ॥ ૪૭॥

સત્તા સર્વપદાર્થાનાં ગમ્યં બ્રહ્માભિધં પદમ્ ॥ ૪૮॥

પરં બ્રહ્મ પરં સત્ત્વં સચ્ચિદાનન્દલક્ષણમ્ ॥ ૪૯॥

અક્ષરં પરમં બ્રહ્મ નિર્વિશેષં નિરઞ્જનમ્ ॥ ૫૦॥

બ્રહ્મૈવૈકમનાદ્યન્તમબ્ધિવત્પ્રવિજૃમ્ભતે ॥ ૫૧॥

ન કિઞ્ચિદ્ભાવનાકારં યત્તદ્બ્રહ્મ પરં વિદુઃ ॥ ૫૨॥

એકમેવાદ્વયં બ્રહ્મ નેહ નનાસ્તિ કિઞ્ચન ॥ ૫૩॥

બ્રહ્મૈવ વિદ્યતે સાક્ષાદ્વસ્તુતોઽવસ્તુતોઽપિ ચ ॥ ૫૪॥

તદ્વિદ્યાવિષયં બ્રહ્મ સત્યજ્ઞાનસુખાદ્વયમ્ ॥ ૫૫॥

શાન્તં ચ તદતીતં ચ પરં બ્રહ્મ તદુચ્યતે ॥ ૫૬॥

અનુભૂતિપરં તસ્માત્સારં બ્રહ્મેતિ કથ્યતે ॥ ૫૭॥

યદિદં બ્રહ્મ પુચ્છાખ્યં સત્યજ્ઞાનાદ્વયાત્મકમ્ ॥ ૫૮॥

સદ્રૂપં પરમં બ્રહ્મ ત્રિપરિચ્છેદવર્જિતમ્ ॥ ૫૯॥

તદ્બ્રહ્માનન્દમદ્વન્દ્વં નિર્ગુણં સત્યચિદ્ઘનમ્ ॥ ૬૦॥

સર્વાધિષ્ઠાનમદ્વન્દ્વં પરં બ્રહ્મ સનાતનમ્ ॥ ૬૧॥

પ્રજ્ઞાનમેવ તદ્બ્રહ્મ સત્યપ્રજ્ઞાનલક્ષણમ્ ॥ ૬૨॥

અસ્તીત્યુક્તે જગત્સર્વં સદ્રૂપં બ્રહ્મ તદ્ભવેત્ ॥ ૬૩॥

ભાતીત્યુક્તે જગત્સર્વં ભાનં બ્રહ્મૈવ કેવલમ્ ॥ ૬૪॥

બ્રહ્મમાત્રં ચિદાકાશં સચ્ચિદાનન્દમદ્વયમ્ ॥ ૬૫॥

બ્રહ્મણોઽન્યતરન્નાસ્તિ બ્રહ્મણોઽન્યજ્જગન્ન ચ ॥ ૬૬॥

બ્રહ્મણોઽન્યદહં નાસ્મિ બ્રહ્મણોઽન્યત્ફલં ન હિ ॥ ૬૭॥

બ્રહ્મણોઽન્યત્તૃણં નાસ્તિ બ્રહ્મણોઽન્યત્પદં ન હિ ॥ ૬૮॥

બ્રહ્મણોઽન્યદ્ગુરુર્નાસ્તિ બ્રહ્મણોઽન્યદસદ્વપુઃ ॥ ૬૯॥

નિત્યાનન્દમયં બ્રહ્મ કેવલં સર્વદા સ્વયમ્ ॥ ૭૦॥

બીજં માયાવિનિર્મુક્તં પરં બ્રહ્મેતિ કીર્ત્યતે ॥ ૭૧॥

મદ્રૂપમદ્વયં બ્રહ્મ આદિમધ્યાન્તવર્જિતમ્ ॥ ૭૨॥

સર્વત્રાવસ્થિતં શાન્તં ચિદ્બ્રહ્મેત્યનુભૂયતે ॥ ૭૩॥

સિદ્ધાન્તોઽધ્યાત્મશાસ્ત્રાણાં સર્વાપહ્નવ એવ હિ ॥ ૭૪॥

નાવિદ્યાસ્તીહ નો માયા શાન્તં બ્રહ્મેદમક્લમમ્ ॥ ૭૫॥

સ્વાત્મન્યારોપિતાશેષાભાસવસ્તુનિરાસતઃ ॥ ૭૬॥

સ્વયમેવ પરં બ્રહ્મ પૂર્ણમદ્વયમક્રિયમ્ ॥ ૭૭॥

રામ એવ પરં બ્રહ્મ રામ એવ પરં તપઃ ॥ ૭૮॥

રામ એવ પરં તત્ત્વં શ્રીરામો બ્રહ્મતારકમ્ ॥ ૭૯॥

ચિદ્રૂપમાત્રં બ્રહ્મૈવ સચ્ચિદાનન્દમદ્વયમ્ ॥ ૮૦॥

ઋતં સત્યં પરં બ્રહ્મ સર્વસંસારભેષજમ્ ॥ ૮૧॥

બ્રહ્મ ચિદ્બ્રહ્મ ભુવનં બ્રહ્મ ભૂતપરમ્પરા ॥ ૮૨॥

બ્રહ્માહં બ્રહ્મચિચ્છત્રુર્બ્રહ્મ ચિન્મિત્રબાન્ધવાઃ ॥ ૮૩॥

બ્રહ્મરૂપતયા બ્રહ્મ કેવલં પ્રતિભાસતે ॥ ૮૪॥

જગદ્રૂપતયાપ્યેતદ્બ્રહ્મૈવ પ્રતિભાસતે ॥ ૮૫॥

વિદ્યાવિદ્યાદિભેદેન ભાવાભાવાદિભેદતઃ ॥ ૮૬॥

ગુરુશિષ્યાદિભેદેન બ્રહ્મૈવ પ્રતિભાસતે ॥ ૮૭॥

ઇદં બ્રહ્મ પરં બ્રહ્મ સત્યં બ્રહ્મ પ્રભુર્હિ સઃ ॥ ૮૮॥

કાલો બ્રહ્મ કલા બ્રહ્મ સુખં બ્રહ્મ સ્વયંપ્રભમ્ ॥ ૮૯॥

એકં બ્રહ્મ દ્વયં બ્રહ્મ મોહો બ્રહ્મ શમાદિકમ્ ॥ ૯૦॥

દોષો બ્રહ્મ ગુણો બ્રહ્મ દમઃ શાન્તં વિભુઃ પ્રભુઃ ॥ ૯૧॥

લોકો બ્રહ્મ ગુરુર્બ્રહ્મ શિષ્યો બ્રહ્મ સદાશિવઃ ॥ ૯૨॥

પૂર્વં બ્રહ્મ પરં બ્રહ્મ શુદ્ધં બ્રહ્મ શુભાશુભમ્ ॥ ૯૩॥

જીવ એવ સદા બ્રહ્મ સ્વયં બ્રહ્મ સનાતનમ્ ॥ ૯૪॥

ઇતિ સાર્ધાન્તિકબ્રહ્મસ્વરૂપવાક્યાનિ ચતુર્નવતિઃ ॥ ૯૪॥

સપ્તદશં પ્રકરણં સમાપ્તમ્ ।

---

૧૮ અથ સાર્ધાન્તિકાવશિષ્ટવાક્યાનિ । (૩૬)

સર્વવિશેષં નેતિનેતીતિ વિહાય યદવશિષ્યતે તદદ્વયં બ્રહ્મ ॥ ૧॥

જીવભાવજગદ્ભાવબાધે પ્રત્યગભિન્નં બ્રહ્મૈવાવશિષ્યતે ॥ ૨॥

પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ॥ ૩॥

પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥ ૪॥

કાર્યોપાધિરયં જીવઃ કારણોપાધિરીશ્વરઃ ॥ ૫॥

કાર્યકારણતાં હિત્વા પૂર્ણબોધોઽવશિષ્યતે ॥ ૬॥

તતઃ સ્તિમિતગમ્ભીરં ન તેજો ન તમસ્તતમ્ ॥ ૭॥

અનાખ્યમનભિવ્યક્તં સત્કિઞ્ચિદવશિષ્યતે ॥ ૮॥

સઙ્કલ્પમનસી ભિન્ને ન કદાચન કેનચિત્ ॥ ૯॥

સઙ્કલ્પજાતે ગલિતે સ્વરૂપમવશિષ્યતે ॥ ૧૦॥

મહાપ્રલયસમ્પત્તૌ હ્યસત્તાં સમુપાગતે ॥ ૧૧॥

અશેષદૃશ્યે સર્ગાદૌ શાન્તમેવાવશિષ્યતે ॥ ૧૨॥

ખેદોલ્લાસવિલાસેષુ સ્વાત્મકર્તૃતયાનયા ॥ ૧૩॥

સ્વસઙ્કલ્પે ક્ષયં યાતે સમતૈવાવશિષ્યતે ॥ ૧૪॥

સમતા સર્વભાવેષુ યાસૌ સત્યપરા સ્થિતિઃ ॥ ૧૫॥

પરમામૃતનામ્ની સા સમતૈવાવશિષ્યતે ॥ ૧૬॥

કાલત્રયમુપેક્ષિત્વા હીનાયાશ્ચૈત્યબન્ધનૈઃ ॥ ૧૭॥

ચિતશ્ચૈત્યનુપેક્ષિત્ર્યાઃ સમતૈવાવશિષ્યતે ॥ ૧૮॥

સા હિ વાચામગમ્યત્વાદસત્તામિવ શાશ્વતીમ્ ॥ ૧૯॥

નૈરાત્મ્યસિદ્ધાન્તદશામુપયાતેઽવશિષ્યતે ॥ ૨૦॥

યાવદ્યાવન્મુનિશ્રેષ્ઠ સ્વયં સન્ત્યજ્યતેઽખિલમ્ ॥ ૨૧॥

તાવત્તાવત્પરાલોકઃ પરમાત્મૈવ શિષ્યતે ॥ ૨૨॥

અભ્યાસેન પરિસ્પન્દે પ્રાણાનાં ક્ષયમાગતે ॥ ૨૩॥

મનઃ પ્રશમમાયાતિ નિર્વાણમવશિષ્યતે ॥ ૨૪॥

જ્ઞેયવસ્તુપરિત્યાગે વિલયં યાતિ માનસમ્ ॥ ૨૫॥

માનસે વિલયં યાતે કૈવલ્યમવશિષ્યતે ॥ ૨૬॥

યતો વાચો નિવર્તન્તે વિકલ્પકલનાન્વિતાઃ ॥ ૨૭॥

વિકલ્પસઙ્ક્ષયાજ્જન્તોઃ પદં તદવશિષ્યતે ॥ ૨૮॥

ચિદ્વ્યોમૈવ કિલાસ્તીહ પરાપરવિવર્જિતમ્ ॥ ૨૯॥

સર્વત્રાસમ્ભવચ્ચૈત્યં યત્કલ્પાન્તેઽવશિષ્યતે ॥ ૩૦॥

પઞ્ચરૂપપરિત્યાગાદર્થરૂપપ્રહાણતઃ ॥ ૩૧॥

અધિષ્ઠાનં પરં તત્ત્વમેકં સચ્છિષ્યતે મહત્ ॥ ૩૨॥

સર્વવેદાન્તસિદ્ધાન્તસારં વચ્મિ યથાર્થતઃ ॥ ૩૩॥

સ્વયં મૃત્વા સ્વયં ભૂત્વા સ્વયમેવાવશિષ્યતે ॥ ૩૪॥

અશબ્દમસ્પર્શમરૂપમવ્યયં તથાઽરસં નિત્યમગન્ધવચ્ચ યત્ ॥ ૩૫॥

અનાદ્યનન્તં મહતઃ પરં ધ્રુવં તદેવ શિષ્યત્યમલં નિરામયમ્ ॥ ૩૬॥

ઇતિ સાર્ધાન્તિકાવશિષ્ટવાક્યાનિ ષટ્ત્રિંશત્ ॥૩૬॥

અષ્ટાદશં પ્રકરણં સમાપ્તમ્ ।

---

૧૯ અથ સાર્ધાન્તિકફલવાક્યાનિ । (૪૦)

સ યો હ વૈ તત્પરમં ॥ ૧॥

બ્રહ્મ વેદ બ્રહ્મૈવ ભવતિ ॥ ૨॥

બ્રહ્મવિદાપ્નોતિ પરમ્ ॥ ૩॥

બ્રહ્મસંસ્થોઽમૃતત્વમેતિ ॥ ૪॥

તરતિ શોકમાત્મવિત્ ॥ ૫॥

ય એવં વેદાહં બ્રહ્માસ્મીતિ સ ઇદં સર્વં ભવતિ ॥ ૬॥

સ એષ વિસુકૃતો વિદુષ્કૃતો બ્રહ્મવિદ્વિદ્વાન્બ્રહ્મૈવાભિપ્રૈતિ ॥ ૭॥

તદ્બ્રહ્મૈવાહમસ્મીતિ બ્રહ્મ પ્રણવમનુસ્મરન્ ભ્રમરકીટન્યાયેન
શરીરત્રયમુત્સૃજ્ય સન્ન્યાસેનૈવ દેહત્યાગં કરોતિ સ કૃતકૃત્યો ભવતિ ॥ ૮॥

તમેવ જ્ઞાત્વા વિદ્વાન્ મૃત્યુમુખાત્ પ્રમુચ્યતે ॥ ૯॥

તદેવં વિદ્વાંસ ઇહૈવામૃતા ભવન્તિ ॥ ૧૦॥

અનાદ્યનન્તં મહતઃ પરં ધ્રુવં નિચાય્ય તં મૃત્યુમુખાત્પ્રમુચ્યતે ॥ ૧૧॥

યજ્જ્ઞાત્વા મુચ્યતે જન્તુરમૃતત્વં ચ ગચ્છતિ ॥ ૧૨॥

યદા પશ્યઃ પશ્યતે રુક્મવર્ણં કર્તારમીશં પુરુષં બ્રહ્મયોનિમ્ ॥ ૧૩॥

તદા વિદ્વાન્પુણ્યપાપે વિધૂય નિરઞ્જનઃ પરમં સામ્યમુપૈતિ ॥ ૧૪॥

એતદ્યો વેદ નિહિતં ગુહાયાં સોઽવિદ્યાગ્રન્થિં વિકિરતીહ સોમ્ય ॥ ૧૫॥

ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ॥ ૧૬॥

ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે ॥ ૧૭॥

યથા નદ્યઃ સ્યન્દમાનાઃ સમુદ્રેઽસ્તં ગચ્છન્તિ નામરૂપે વિહાય ॥ ૧૮॥

તથા વિદ્વાન્નામરૂપાદ્વિમુક્તઃ પરાત્પરં પુરુષમુપૈતિ દિવ્યમ્ ॥ ૧૯॥

જ્ઞાત્વા તં મૃત્યુમત્યેતિ નાન્યઃ પન્થા વિમુક્તયે ॥ ૨૦॥

તદ્બ્રહ્માહમિતિ જ્ઞાત્વા બ્રહ્મ સમ્પદ્યતે ધ્રુવમ્ ॥ ૨૧॥

યત્ર યત્ર મૃતો જ્ઞાની પરમાક્ષરવિત્સદા ॥ ૨૨॥

પરબ્રહ્મણિ લીયતે ન તસ્યોત્ક્રાન્તિરિષ્યતે ॥ ૨૩॥

યદ્યત્સ્વાભિમતં વસ્તુ તત્ત્યજન્મોક્ષમશ્નુતે ॥ ૨૪॥

અસઙ્કલ્પનશસ્ત્રેણ છિન્નં ચિત્તમિદં યદા ॥ ૨૫॥

સર્વં સર્વગતં શાન્તં બ્રહ્મ સમ્પદ્યતે તદા ॥ ૨૬॥

પ્રિયેષુ સ્વેષુ સુકૃતમપ્રિયેષુ ચ દુષ્કૃતમ્ ॥ ૨૭॥

વિસૃજ્ય ધ્યાનયોગેન બ્રહ્માપ્યેતિ સનાતનમ્ ॥ ૨૮॥

ઘટાકાશમિવાત્માનં વિલયં વેત્તિ તત્ત્વતઃ ॥ ૨૯॥

સ ગચ્છતિ નિરાલમ્બં જ્ઞાનાલોકં સનાતનમ્ ॥ ૩૦॥

તૃણાગ્રેષ્વમ્બરે ભાનૌ નરનાગામરેષુ ચ ॥ ૩૧॥

યસ્તિષ્ઠતિ તદેવાહમિતિ મત્વા ન શોચતિ ॥ ૩૨॥

સર્વસાક્ષિણમાત્માનં વર્ણાશ્રમવિવર્જિતમ્ ॥ ૩૩॥

બ્રહ્મરૂપતયા પશ્યન્બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૩૪॥

તદ્બ્રહ્માનન્દમદ્વન્દ્વં નિર્ગુણં સત્યચિદ્ઘનમ્ ॥ ૩૫॥

વિદિત્વા સ્વાત્મનો રૂપં ન બિભેતિ કુતશ્ચન ॥ ૩૬॥

વાસનાં સમ્પરિત્યજ્ય મયિ ચિન્માત્રવિગ્રહે ॥ ૩૭॥

યસ્તિષ્ઠતિ ગતસ્નેહઃ સોઽહં સચ્ચિત્સુખાત્મકઃ ॥ ૩૮॥

દર્શનાદર્શને હિત્વા સ્વયં કેવલરૂપતઃ ॥ ૩૯॥

ય આસ્તે કપિશાર્દૂલ બ્રહ્મ ન બ્રહ્મવિત્સ્વયમ્ ॥ ૪૦॥

ઇતિ સાર્ધાન્તિકફલવાક્યાનિ ચત્વારિંશત્ ॥૪૦॥

એકોનવિંશં પ્રકરણં સમાપ્તમ્ ।

૨૦ અથ સાર્ધાન્તિકવિદેહમુક્તિવાક્યાનિ ॥ (૭૭)

વિમુક્તશ્ચ વિમુચ્યતે ॥ ૧॥

ગુહાગ્રન્થિભ્યો વિમુક્તોઽમૃતો ભવતિ ॥ ૨॥

અથાકામયમાનો યોઽકામો નિષ્કામ આત્મકામ આપ્તકામો ન તસ્ય
પ્રાણા ઉત્ક્રામન્ત્યત્રૈવ સમવલીયન્તે બ્રહ્મૈવ સન્બ્રહ્માપ્યેતિ ॥ ૩॥

તદ્યથાઽહિ નિર્લ્વયની વલ્મીકે મૃતા પ્રત્યસ્તા શયીતૈવમેવેદં શરીરં
શેતેઽથાયમશરીરોઽમૃતઃ પ્રાણો બ્રહ્મૈવ તેજ એવ ॥ ૪॥

અશરીરો નિરિન્દ્રિયોઽપ્રાણોઽતમાઃ સચ્ચિદાનન્દમાત્રઃ સ સ્વરાટ્ ભવતિ ॥ ૫॥

પૃથિવ્યપ્સુ પ્રલીયત આપો જ્યોતિષિ લીયન્તે જ્યોતિર્વાયૌ વિલીયતે વાયુરાકાશ
આકાશમિન્દ્રિયેષ્વિન્દ્રિયાણિ તન્માત્રેષુ તન્માત્રાણિ ભૂતાદૌ વિલીયન્તે
ભૂતાદિર્મહતિ વિલીયતે મહાનવ્યક્તે વિલીયતે વ્યક્તમક્ષરે વિલીયતેઽક્ષરં
તમસિ વિલીયતે તમઃ પરે દેવ એકીભવતિ પરસ્તાન્ન સન્નાસન્ન સદસત્ ॥ ૬॥

બ્રહ્માણ્ડં તદ્ગતલોકાન્કાર્યરૂપાંશ્ચ કારણત્વં પ્રાપયિત્વા તતઃ
સૂક્ષ્માઙ્ગં કર્મેન્દ્રિયાણિ પ્રાણાશ્ચ જ્ઞાનેન્દ્રિયાણ્યન્તઃકરણચતુષ્ટયં
ચૈકીકૃત્ય સર્વાણિ ભૌતિકાનિ કારણે ભૂતપઞ્ચકે સંયોજ્ય ભૂમિં જલે
જલં વહ્નૌ વહ્નિં વાયૌ વાયુમાકાશે ચાકાશમહઙ્કારે ચાહઙ્કારં
મહતિ મહદવ્યક્તે અવ્યક્તં પુરુષે ક્રમેણ વિલીયતે વિરાટ્ હિરણ્યગર્ભેશ્વરા
ઉપાધિવિલયાત્પરમાત્મનિ લીયન્તે ॥ ૭॥

પ્રારબ્ધક્ષયવશાદ્દેહત્રયભઙ્ગં પ્રાપ્યોપાધિનિર્મુક્તઘટાકાશવત્પરિપૂર્ણતા
વિદેહમુક્તિઃ ॥ ૮॥

યદા સર્વે પ્રમુચ્યન્તે કામા યેઽસ્ય હૃદિ શ્રિતાઃ ॥ ૯॥

અથ મર્ત્યોઽમૃતો ભવત્યત્ર બ્રહ્મ સમશ્નુતે ॥ ૧૦॥

વેદાન્તવિજ્ઞાનસુનિશ્ચિતાર્થાઃ સન્ન્યાસયોગાદ્યતયઃ શુદ્ધસત્ત્વાઃ ॥ ૧૧॥

તે બ્રહ્મલોકેષુ પરાન્તકાલે પરામૃતાઃ પરિમુચ્યન્તિ સર્વે ॥ ૧૨॥

તસ્યાભિધ્યાનાદ્યોજનાત્તત્ત્વભાવાદ્ભૂયશ્ચાન્તે વિશ્વમાયાનિવૃત્તિઃ ॥ ૧૩॥

જીવન્મુક્તપદં ત્યક્ત્વા સ્વદેહે કાલસાત્કૃતે ॥ ૧૪॥

વિશત્યદેહમુક્તત્વં પવનોઽસ્પન્દતામિવ ॥ ૧૫॥

તતસ્તત્સમ્બભૂવાસૌ યદ્ગિરામપ્યગોચરમ્ ॥ ૧૬॥

યચ્છૂન્યવાદિનાં શૂન્યં બ્રહ્મ બ્રહ્મવિદાં ચ યત્ ॥ ૧૭॥

વિજ્ઞાનમાત્રં વિજ્ઞાનવિદાં યદમલાત્મકમ્ ॥ ૧૮॥

પુરુષઃ સાઙ્ખ્યસૃષ્ટીનામીશ્વરો યોગવાદિનામ્ ॥ ૧૯॥

શિવઃ શૈવાગમસ્થાનાં કાલઃ કાલૈકવાદિનામ્ ॥ ૨૦॥

યત્સર્વશાસ્ત્રસિદ્ધાન્તં યત્સર્વહૃદયાનુગમ્ ॥ ૨૧॥

યત્સર્વં સર્વગં વસ્તુ યત્તત્ત્વં તદસૌ સ્થિતઃ ॥ ૨૨॥

યદનુક્તમનિષ્પન્દં દીપકં તેજસામપિ ॥ ૨૩॥

સ્વાનુભૂત્યૈકમાનં ચ યત્તત્ત્વં તદસૌ સ્થિતઃ ॥ ૨૪॥

યદેકં ચાપ્યનેકં ચ સાઞ્જનં ચ નિરઞ્જનમ્ ॥ ૨૫॥

યત્સર્વં ચાપ્યસર્વં ચ યત્તત્ત્વં તદસૌ સ્થિતઃ ॥ ૨૬॥

નિરાનન્દોઽપિ સાનન્દઃ સચ્ચાસચ્ચ બભૂવ સઃ ॥ ૨૭॥

ન ચેતનો ન ચ જડો ન ચૈવાસન્ન સન્મયઃ ॥ ૨૮॥

અજમમરમનાદ્યમાદ્યમેકં પદમમલં સકલં ચ નિષ્કલં ચ ॥ ૨૯॥

સ્થિત ઇતિ સ તદા નભઃસ્વરૂપાદપિ વિમલાસ્થિતિરીશ્વરક્ષણેન ॥ ૩૦॥

વ્યપગતકલનાકલઙ્કશુદ્ધઃ સ્વયમમલાત્મનિ પાવને પદેઽસૌ ॥ ૩૧॥

સલિલકણ ઇવામ્બુધૌ મહાત્મા વિગલિતવાસનમેકતાં જગામ ॥ ૩૨॥

સંશાન્તદુઃખમજડાત્મકમેકસુપ્તમાનન્દમન્થરમપેતરજસ્તમો યત્ ॥ ૩૩॥

આકાશકોશતનવોઽતનવો મહાન્તસ્મિન્પદે ગલિતચિત્તલવા ભવન્તિ ॥ ૩૪॥

વિદેહમુક્ત એવાસૌ વિદ્યતે નિષ્કલાત્મકઃ ॥ ૩૫॥

સમગ્રાગ્ર્યગુણાધારમપિ સત્ત્વં પ્રલીયતે ॥ ૩૬॥

વિદેહમુક્તૌ વિમલે પદે પરમપાવને ॥ ૩૭॥

વિદેહમુક્તિવિષયે તસ્મિન્ સત્ત્વક્ષયાત્મકે ॥ ૩૮॥

ચિત્તનાશે વિરૂપાખ્યે ન કિઞ્ચિદિહ વિદ્યતે ॥ ૩૯॥

ન ગુણા નાગુણાસ્તત્ર ન શ્રીર્નાશ્રીર્ન ચૈકતા ॥ ૪૦॥

જીવન્નેવ સદા મુક્તઃ કૃતાર્થો બ્રહ્મવિત્તમઃ ॥ ૪૧॥

ઉપાધિનાશાદ્બ્રહ્મૈવ સન્બ્રહ્માપ્યેતિ નિર્દ્વયમ્ ॥ ૪૨॥

શાસ્ત્રેણ નશ્યેત્પરમાર્થદૃષ્ટિઃ કાર્યક્ષમં નશ્યતિ ચાપરોક્ષાત્ ॥ ૪૩॥

પ્રારબ્ધનાશાત્પ્રતિભાસનાશ એવં વિધા નશ્યતિ ચાત્મમાયા ॥ ૪૪॥

અહિનિર્લ્વયની સર્પનિર્વોકો જીવવર્જિતઃ ॥ ૪૫॥

વલ્મીકે પતિતસ્તિષ્ઠેત્તં સર્પો નાભિમન્યતે ॥ ૪૬॥

એવં સ્થૂલં ચ સૂક્ષ્મં ચ શરીરં નાભિમન્યતે ॥ ૪૭॥

પ્રત્યગ્જ્ઞાનશિખિધ્વસ્તે મિથ્યાજ્ઞાને સહેતુકે ॥ ૪૮॥

નેતિ નેતીતિ રૂપત્વાદશરીરો ભવત્યયમ્ ॥ ૪૯॥

વિશ્વશ્ચ તૈજસશ્ચૈવ પ્રાજ્ઞશ્ચેતિ ચ તે ત્રયઃ ॥ ૫૦॥

વિરાડ્ઢિરણ્યગર્ભશ્ચ ઈશ્વરશ્ચેતિ ચ તે ત્રયઃ ॥ ૫૧॥

બ્રહ્માણ્ડં ચૈવ પિણ્ડાણ્ડં લોકા ભૂરાદયઃ ક્રમાત્ ॥ ૫૨॥

સ્વસ્વોપાધિલયાદેવ લીયન્તે પ્રત્યગાત્મનિ ॥ ૫૩॥

તૂષ્ણીમેવ સ્થિતસ્તૂષ્ણીં તૂષ્ણીં સત્યં ન કિઞ્ચન ॥ ૫૪॥

કાલભેદં વસ્તુભેદં દેશભેદં સ્વભેદકમ્ ॥ ૫૫॥

કિઞ્ચિદ્ભેદં ન તસ્યાસ્તિ કિઞ્ચિદ્વાપિ ન વિદ્યતે ॥ ૫૬॥

જીવેશ્વરેતિ વા ક્વેતિ વેદશાસ્ત્રાણિ ક્વાહં ત્વિતિ ॥ ૫૭॥

ઇદં ચૈતન્યમેવેતિ અહં ચૈતન્યમિત્યપિ ॥ ૫૮॥

ઇતિ નિશ્ચયશૂન્યો યો વૈદેહી મુક્ત એવ સઃ ॥ ૫૯॥

બ્રહ્મભૂતઃ પ્રશાન્તાત્મા બ્રહ્માનન્દમયઃ સુખી ॥ ૬૦॥

સ્વચ્છરૂપો મહામૌની વૈદેહી મુક્ત એવ સઃ ॥ ૬૧॥

બ્રહ્મૈવાહં ચિદેવાહમેવં વાપિ ન ચિન્ત્યતે ॥ ૬૨॥

ચિન્માત્રેણૈવ યસ્તિષ્ઠેદ્વૈદેહી મુક્ત એવ સઃ ॥ ૬૩॥

ચૈતન્યમાત્રસંસિદ્ધઃ સ્વાત્મારામઃ સુખાસનઃ ॥ ૬૪॥

તુર્યતુર્યઃ પરાનન્દો વૈદેહીમુક્ત એવ સઃ ॥ ૬૫॥

યસ્ય પ્રપઞ્ચભાનં ન બ્રહ્માકારમપીહ ન ॥ ૬૬॥

અતીતાતીતભાવો યો વૈદેહી મુક્ત એવ સઃ ॥ ૬૭॥

ચિત્તવૃત્તેરતીતો યશ્ચિત્તવૃત્ત્યવભાસકઃ ॥ ૬૮॥

સર્વવૃત્તિવિહીનાત્મા વૈદેહી મુક્ત એવ સઃ ॥ ૬૯॥

સર્વત્રૈવાહમાત્માસ્મિ પરમાત્મા પરાત્મકઃ ॥ ૭૦॥

નિત્યાનન્દસ્વરૂપાત્મા વૈદેહીમુક્ત એવ સઃ ॥ ૭૧॥

જીવાત્મા પરમાત્મેતિ ચિન્તાસર્વસ્વવર્જિતઃ ॥ ૭૨॥

સર્વસઙ્કલ્પહીનાત્મા વૈદેહી મુક્ત એવ સઃ ॥ ૭૩॥

આત્મજ્ઞેયાદિહીનાત્મા યત્કિઞ્ચિદિદમાત્મકઃ ॥ ૭૪॥

ભાવાભાવવિહીનાત્મા વૈદેહી મુક્ત એવ સઃ ॥ ૭૫॥

ૐકારવાચ્યહીનાત્મા સર્વવાચ્યવિવર્જિતઃ ॥ ૭૬॥

અવસ્થાત્રયહીનાત્મા વૈદેહી મુક્ત એવ સઃ ॥ ૭૭॥

ઇતિ સાર્ધાન્તિકવિદેહમુક્તિવાક્યાનિ સપ્તસપ્તતિઃ ॥ ૭૭॥

ઇત્યેવં સાર્ધાન્તિકવિદ્યાદિવિદેહકૈવલ્યન્તમહા-
વાક્યાન્યષ્ટોત્તરસહસ્રમ્ ॥ ૧૦૦૮॥

વિંશં પ્રકરણં સમાપ્તમ્ ।

---

અથ ઉપસંહારઃ ।

વિધ્યઙ્ઘ્રિર્બન્ધમુગ્ગુલ્ફો હ્યવિદ્યેયજઙ્ઘ્રકઃ ।

જગન્મિથ્યા જાનુદેશસ્તૂપદેશોરુદેશકઃ ॥

બ્રહ્માત્મૈક્યકટીદેશો વિદ્વન્મનનનાભિકઃ ।
જીવન્મુક્તાખ્યદહરઃ સ્વાનુભૂતિકરદ્વયઃ ॥

સ્વસમાધિસ્કન્ધદેશઃ સ્વસ્વરૂપાખ્યકન્ધરઃ ।
ફલભૂતમહાવાક્યફલો વૈદેહમસ્તકઃ ॥

એવં વિદ્યાદ્યદેહાન્તમહાવાક્યકલેવરઃ ।
વસ્તુતો નિર્વિશેષાત્મા ત્રિપાન્નારાયણોઽસ્મ્યહમ્ ॥

યન્મહાવાક્યસિદ્ધાન્તં મુક્તચિત્તૈકગોચરમ્ ।
વાસુદેવેન્દ્રસંજ્ઞં તં નૌમિ સર્વાત્મકં મહઃ ॥

ઇત્યુપસંહારઃ ।

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્ય-
શ્રીવાસુદેવેન્દ્રસરસ્વતીચરણકમલમકરન્દ-
તૃપ્તસ્વાન્તરામચન્દ્રેન્દ્રગ્રથિતેશાવાસ્યા-
દ્યષ્ટોત્તરશતોપનિષત્સારસઙ્ગ્રહ-
ભૂતાષ્ટોત્તરસહસ્રમહાવાક્યરત્નાવલિઃ સમ્પૂર્ણા ॥

From book edited by Vasudev LakShman Panshikar 7th edn.
Encoded and proofread by Sunder Hattangadi

*Mahavakya Ratnavali*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*